

# ॥स्तोत्रसङ्ग्रहः॥

(चतुःसप्ततिस्तोत्राणां सङ्ग्रहः)

# ॥स्तोत्रसङ्ग्रहः॥

(त्रिपञ्चाशत्स्तोत्राणां सङ्ग्रहः)

(संवर्धितावृत्तिः)

श्रुतभवनसंशोधनकेन्द्रम्

पुणे

| | | |
|---|---|---|
| **ग्रंथनाम** | : | **स्तोत्रसङ्ग्रहः** |
| **कर्ता** | : | अनेकजैनश्रमण |
| **सम्पादक** | : | मुनिवैराग्यरतिविजयगणी |
| **विषय** | : | स्तोत्र/स्तवन/स्तुति |
| **प्रकाशक** | : | शुभाभिलाषा (रिलिजीयस) ट्रस्ट (E-18511, Ahmedabad)<br>© श्रुतभवन संशोधन केन्द्र |
| **पत्र** | : | २२ + १२२ = १४४ |
| **आवृत्ति** | : | प्रथम, वि.सं.२०७३, ई. २०१७ |
| **स्वामित्व** | : | श्रमणसंस्थाधीनशुभाभिलाषाविश्वस्तधार्मिकसंस्थान। |

**-: प्राप्तिस्थल :-**

| | | |
|---|---|---|
| **पूना** | : | **श्रुतभवन संशोधन केन्द्र,**<br>४७/४८ अचल फार्म, आगममंदिर से आगे,<br>सच्चाइ माता मंदिर के आगे, कात्रज, पुणे-४११ ०४६<br>मो. ७७४४००५७२८ (9-00 a.m. to 5-00 p.m.) |
| **अहमदाबाद** | : | **श्री उमंगभाई शाह,**<br>अर्हम् फ्लेक्सीपेक, २०१, तीर्थराज कोम्प्लेक्स, एलीसब्रीज,<br>वी. एस. हॉस्पिटल के सामने, मादलपुर, अहमदाबाद-६<br>मो. ९८२५१२८४८६ |
| **मुंबई** | : | **श्री गौरवभाई शाह**<br>सी/१११, जैन एपार्टमेंट, ६० फीट रोड, देवचंद नगर रोड, भायंदर (वेस्ट)<br>मुंबई-४०११०१. मो.०९८३३१३९८८३ |
| **सुरत** | : | **श्री मितुलभाई धनेशा**<br>C/o. सिया मेन्युफेक्चरींग, सुखदेव कोम्प्लेक्स,<br>२ री मंझिल, टोरंट पॉवर हाऊस के पास, वास्तादेवी रोड,<br>कतारगाम, सुरत-३९५००४ मो. ०९३७७०५९६७३ |
| **मुद्रण** | : | **नूतन आर्ट, अहमदाबाद** |

# પ્રકાશકીય

પરમાત્મા શ્રી મહાવીર દેવે જગતને બે અણમોલ ભેટ આપી છે - અહિંસા અને અનેકાંત. 'અહિંસા અને અનેકાંતના સહારે આત્મધ્યાનની સાધના' ભગવાનના ઉપદેશનું કેંદ્રબિંદુ છે. ભગવાનનો આ ઉપદેશ આગમ અને શાસ્ત્રોના માધ્યમથી પ્રવાહિત થયો છે. આગમ અને શાસ્ત્રો જૈનધર્મની માત્ર ધરોહર જ નથી પરંતુ અણમોલ વિરાસત પણ છે. પરમાત્મના નિર્વાણના એક હજાર વર્ષ પછી આગમ અને શાસ્ત્રો લખાયા. શરુઆતમાં તાડપત્રો ઉપર અને ત્યાર પછી કાગળ ઉપર શાસ્ત્રો લખવામાં આવતા હતા. આજે શ્રી સંઘ પાસે હાથથી લખેલી દશ લાખ હસ્તપ્રતો છે. મુદ્રણ યુગ શરુ થયા પછી આગમ અને શાસ્ત્રો છપાવા લાગ્યા.

લેખન અને મુદ્રણ કરતી વખતે આગમ અને શાસ્ત્રોમાં માનવ સહજ સ્વભાવવશ ભૂલો થઇ છે. આજે ઘણાં શાસ્ત્રો મુદ્રિત રૂપે મળે છે જેનું સંશોધન આજે પણ બાકી છે, જે માત્ર પ્રાચીન તાડપત્ર ઉપર લખેલી હસ્તપ્રતોના આધારે થઇ શકે છે. શ્રુતભવનનું લક્ષ્ય આના મુખ્ય આધારે સંશોધન કાર્ય કરવાનું છે. સંશોધન કાર્ય કરવા માટે અમારી સંચાલન સમિતિએ વિશેષજ્ઞ પંડિતોની નિમણૂક કરી છે.જેઓ ટ્રેનીંગ મેળવીને **પૂ. મુનિશ્રી વૈરાગ્યરતિ વિ. ગણિવર**ના માર્ગદર્શન પ્રમાણે આ કાર્યમાં સંલગ્ન છે. આ કામમાં અનેક સમુદાયોના વિશેષજ્ઞ આચાર્યભગવંતોનું માર્ગદર્શન અને સહાય મળી રહી છે. કાર્યની વિશાળતા, મહત્તા અને ઉપયોગિતા જોતાં આગામી સમયમાં પંડિતોની સંખ્યા વધારવાનો ઇરાદો છે.

આની સાથે બીજું પણ આયોજન છે, આજ સુધી જે શાસ્ત્ર મુદ્રિત રૂપમાં ઉપલબ્ધ નથી તેનું સંશોધન કરીને પ્રકાશિત કરવા. આ શાસ્ત્રોને બે વિભાગમાં વહેંચી શકાય છે. ૧ સાધુ ઉપયોગી ૨ ગૃહસ્થ ઉપયોગી. ગૃહસ્થ ઉપયોગી શાસ્ત્રોનો સરળ સારાંશ કરીને અંગ્રેજી, હિન્દી, અને ગુજરાતી ભાષામાં પ્રસ્તુત કરવામાં આવશે.

स्तोत्रसङ्ग्रहः નામનો ત્રેપન સ્તોત્રોનો સંગ્રહ શ્રી સંઘના ચરણોમાં સમર્પિત કરતા અમે આનંદ અનુભવીએ છીએ.

વિ.સં.૨૦૬૭ માં **પૂ.આ.ભ.શ્રી હર્ષસાગરજી મ.**એ આગમમંદિર, પૂનામાં રહેલ ૬૦૦ હસ્તપ્રતોને સરખી કરવાનું કાર્ય શ્રુતભવનને સોંપ્યું હતું. તેમાં અનેક અપ્રગટ કૃતિઓ મળી. એક પ્રતમાં લગભગ ૩૦ જેટલા અપ્રગટ સ્તોત્ર મળ્યાં. સ્તોત્ર એટલે ભગવાનની સ્તુતિ. આ સ્તોત્ર સંસ્કૃત, પ્રાકૃત અને અપભ્રંશ ભાષામાં રચાયેલા છે. **આ.શ્રી કૈલાસસાગરસૂ. જ્ઞાનમંદિર, કોબા**થી કેટલાંક સ્તોત્રની હસ્તપ્રતો સાંપડી તેના આધારે ૫૩ સ્તોત્રોનો સંગ્રહ પ્રગટ થઇ રહ્યો છે.

અહીં સંગૃહીત થયેલાં સ્તોત્રો પ્રાચીન છે અને આજ સુધી અપ્રગટ છે. તેનો આધાર લઇને વિવિધ પ્રતો સાથે મેળવીને પરમ ઉપકારી પરમ પૂજ્ય આચાર્યદેવ શ્રીમદ્ વિજય **રામચંદ્રસૂરીશ્વરજી** મહારાજાના શિષ્ય પૂજ્ય ગુરુદેવ મુનિપ્રવરશ્રી **વૈરાગ્યરતિવિજયજી** ગણિવરે શ્રુતભવન સંશોધન કેંદ્રના સહકર્મિઓની સહાયથી સંપાદન તૈયાર કર્યું છે. પ્રાચીન કૃતિનું પ્રકાશન કરવા દ્વારા હસ્તપ્રતોમાં સચવાયેલા શાશ્વત જ્ઞાનને ભવિષ્યની પેઢી સુધી પહોંચાડવાનો લાભ અમને પ્રાપ્ત થયો તેનો આનંદ છે.

પરમ પૂજ્ય અધ્યાત્મયોગી આચાર્યદેવ શ્રીમદ્ વિજય **કલાપૂર્ણસૂરીશ્વરજી** મ.સા.ના શિષ્યરત્ન પરમ પૂજ્ય

પ્રશાંતમૂર્તિ આચાર્યદેવ શ્રીમદ્ વિજય **તીર્થભદ્રસૂરીશ્વરજી** મ.સા.ની પાવન પ્રેરણાથી આ ગ્રંથના પ્રકાશનનો લાભ **શ્રી ઘાટકોપર જૈન શ્વેતાંબર મૂર્તિપૂજક તપગચ્છ સંઘે** જ્ઞાનનિધિમાંથી લીધો છે. તેમની શ્રુતભક્તિની હૃદયપૂર્વક અનુમોદના.

શ્રુતભવનમાં કાર્યરત સંપાદકગણ તેમજ શ્રુતભવન સંશોધન કેંદ્રની તમામ પ્રવૃત્તિનાં મુખ્ય આધારસ્તંભ **માંગરોળ (ગુજરાત) નિવાસી માતુશ્રી ચંદ્રકલાબેન સુંદરલાલ શેઠ** પરિવાર પ્રત્યે આભારની લાગણી વ્યક્ત કરું છું.

ભરત શાહ

(માનદ અધ્યક્ષ)

**શ્રુતપ્રેમી**

પરમ પૂજ્ય અધ્યાત્મયોગી

**આચાર્યદેવ શ્રીમદ્ વિજય કલાપૂર્ણસૂરીશ્વરજી** મ.સા.ના શિષ્યરત્ન

પરમ પૂજ્ય પ્રશાંતમૂર્તિ

**આચાર્યદેવ શ્રીમદ્ વિજય તીર્થભદ્રસૂરીશ્વરજી** મ.સા.ની

પાવન પ્રેરણાથી

**શ્રી ઘાટકોપર જૈન શ્વેતાંબર મૂર્તિપૂજક તપાગચ્છ સંઘ**

(નવરોજી લેન, ઘાટકોપર, મુંબઇ)

# अनुक्रम


| | | |
|---|---|---|
| सम्पादकीयम् | पू.मु.श्रीवैराग्यरतिविजयगणिवरः | |
| अवगाहनम् | पू.पं. श्रीमोक्षरतिविजयगणिवरः | |

| नाम | कर्ता | पत्र |
|---|---|---|
| **(१) संस्कृतस्तोत्राणि** | | |
| (१-१) सुप्रभाताष्टकम् | अज्ञातः | ३ |
| (१-२) वीतरागस्तवनम् (वृषभजिनस्तवनम्) | अज्ञातः | ४ |
| (१-३) वृषभदेवस्तवनम् | आ.श्रीऋषिवर्द्धनसूरिः | ५ |
| (१-४) शान्तिजिनस्तवनम् | उपा.श्रीमेरुनन्दनगणी | ६ |
| (१-५) भृगुकच्छनगरमण्डन श्रीमुनिसुव्रतस्वामिस्तवनम् | आ.श्रीऋषिवर्द्धनसूरिः | ८ |
| (१-६) अष्टप्रातिहार्यगर्भितपार्श्वजिनस्तवनम् (१) | पूर्णभद्रगणी | ९ |
| (१-७) अष्टप्रातिहार्यगर्भितपार्श्वजिनस्तवनम् (२) | अज्ञातः | १० |
| (१-८) पार्श्वजिनस्तवनम् | आ.श्रीअजितसिंहसूरिः | ११ |
| (१-९) चिन्तामणिपार्श्वजिनस्तोत्रम् | कुशललाभगणी | १२ |
| (१-१०) पार्श्वजिनलघुस्तवनम्(१) | अज्ञातः | १३ |
| (१-११) पार्श्वजिनलघुस्तवनम्(२) | अज्ञातः | १४ |
| (१-१२) जीरापल्ल्यष्टकम् | उपा.श्रीमेरुनन्दनगणी | १५ |
| (१-१३) करहेटकपार्श्वजिनस्तोत्रम् | उपा.श्रीमेरुनन्दनगणी | १७ |
| (१-१४) स्तम्भनकपार्श्वजिनस्तवनम् | उपा.श्रीजयसागरगणी | १८ |
| (१-१५) चतुर्विंशतिजिनस्तवनम् | अज्ञातः | १९ |
| (१-१६) नगरकोटमण्डन चतुर्विंशतिजिनस्तवनम् | आ.श्रीऋषिवर्द्धनसूरिः | २० |
| (१-१७) चतुर्विंशतिजिनस्तुतिः (चैत्यवन्दनचतुर्विंशतिका) | आ.श्रीऋषिवर्द्धनसूरिः | २१ |
| (१-१८) विहरमानजिनस्तवनम् | आ.श्रीऋषिवर्द्धनसूरिः | ३४ |
| (१-१९) पञ्चपरमेष्ठिस्तवनम् | आ.श्रीजिनप्रभसूरिः | ३५ |
| **(२) प्राकृतस्तोत्राणि** | | |

| | | | |
|---|---|---|---|
| (२-१) | कल्याणकतिथिगर्भितपार्श्वजिनस्तोत्रम् (कल्लाणगतिहिगब्भिअं पासजिणथुत्तं) | अज्ञातः | ३९ |
| (२-२) | स्तम्भनकपार्श्वजिनविज्ञप्तिः (थंभणगपासजिणविण्णत्ती) | अज्ञातः | ४० |
| (२-३) | शाश्वतचैत्यस्तोत्रम् (सासयचेइयथुत्तं) (१) | अज्ञातः | ४२ |
| (२-४) | शाश्वतचैत्यस्तोत्रम् (सासयचेइयथुत्तं) (२) | अज्ञातः | ४३ |


**(३) अपभ्रंशस्तोत्राणि**


| | | | |
|---|---|---|---|
| (३-१) | चतुस्त्रिंशदतिशयगर्भितवृषभजिनविज्ञप्तिः (चौतीसअतिसयविनति) | अज्ञातः | ४७ |
| (३-२) | विचारस्तोत्रम् (वियारथुत्तु) | अज्ञातः | ४९ |
| (३-३) | शान्तिस्तवजन्माभिषेकः (सिरीसंतिथोयजम्माभिसेउ) | अज्ञातः | ५२ |
| (३-४) | शान्तिजिनविज्ञप्तिः (संतिजिणविण्णत्ती) | कीर्तिराजः | ५४ |
| (३-५) | शांतिनाथस्तवनम् (संतिणाहथवणं) | उपा.श्रीविनयप्रभगणी | ५६ |
| (३-६) | नेमिजिनविज्ञप्तिः (णेमिजिणविण्णत्ती) | कीर्तिराजः | ५७ |
| (३-७) | पार्श्वजिनस्तोत्रम् (लघु) (पासजिणथुत्तं) | उपा.श्रीगुणरत्नगणी | ५९ |
| (३-८) | पार्श्वजिनस्तोत्रम् (लघु) (पासजिणथुत्तं) | उपा.श्रीगुणरत्नगणी | ६० |
| (३-९) | पार्श्वजिनस्तोत्रम् (लघु) (पासजिणथुत्तं) | उपा.श्रीगुणरत्नगणी | ६१ |
| (३-१०) | जीरापल्लीपार्श्वजिनविज्ञप्तिः (जीरावल्लीपासजिणविण्णत्ती) | उपा.श्रीविजयतिलकगणी | ६२ |
| (३-११) | जीरापल्लीपार्श्वजिनविज्ञप्तिः (जीरावल्लीपासजिणविण्णत्ती) | अज्ञातः | ६३ |
| (३-१२) | जीरापल्लीपार्श्वजिनस्तोत्रम् (जीरावल्लीपासजिणथुत्तं) | अज्ञातः | ६४ |
| (३-१३) | देवलवाडपार्श्वजिनलघुस्तोत्रम् (देवलवाडपासजिणलहुथुत्तं) | उपा.श्रीसाधुनन्दनगणी | ६६ |
| (३-१४) | गोडीपार्श्वजिनलघुस्तवनम् (गोडीपासजिणलहुथवणं) | उपा.श्रीजयसागरगणी | ६७ |
| (३-१५) | स्तम्भनकपार्श्वजिनस्तोत्रम् (१) (थंभणयपासजिणथुत्तं) | अज्ञातः | ६८ |
| (३-१६) | स्तम्भनपार्श्वजिनस्तोत्रम् (२) (थंभयपासजिणथुत्तं) | अज्ञातः | ६९ |
| (३-१७) | फलवर्धीपार्श्वजिनस्तोत्रम् (फलवद्धीपासजिणथुत्तं) | अज्ञातः | ७० |
| (३-१८) | वरकाणपार्श्वजिनस्तोत्रम् (वरयाणपासजिणथुत्तं) | सोमकुञ्जरगणी | ७१ |
| (३-१९) | पञ्चमीमाहात्म्यगर्भितपार्श्वजिनलघुस्तवनम् (पंचमीमाहप्पगब्भिअपासजिणलहुथवणं) | उपा.श्रीजयसागरगणी | ७२ |
| (३-२०) | श्रीमहावीरजिनस्तोत्रम् (सिरिमहावीरजिणथुत्तं) | अज्ञातः | ७३ |
| (३-२१) | चतुर्विंशतिजिनस्तवनम् (१) (चउवीसजिणथवणं) | अज्ञातः | ७७ |
| (३-२२) | चतुर्विंशतिजिनस्तोत्रम् (२) (चउवीसजिणथुत्तं) | राजकीर्तिः | ७९ |

| | | | |
|---|---|---|---|
| (३-२३) | सीमन्धरस्वामिस्तोत्रम् (सीमंधरसामीथुत्तं) | अज्ञातः | ८० |
| (३-२४) | सीमन्धरस्वामिविज्ञप्तिः (सीमंधरसामीविण्णत्ती) | उपा.श्रीविजयतिलकगणी | ८२ |
| (३-२५) | शत्रुंजयचैत्यपरिपाटीविवाहलो (सेत्तुंजयचइत्तपरिवाडीविवाहलु) | अज्ञातः | ८४ |
| (३-२६) | अष्टापदस्तवनम् (अट्ठावयथवणं) | उपा.श्रीजयसागरगणी | ८७ |
| (३-२७) | वीतरागविज्ञप्तिका (वीयरागविण्णतिया) | उपा.श्रीविनयप्रभगणी | ९२ |
| (३-२८) | नन्दीश्वरचतुष्पदी (नंदीसरचउप्पई) | अज्ञातः | ९३ |
| (३-२९) | नन्दीश्वरस्तोत्रम् (नंदीसरथुत्तं) | मेरुमुनिः | ९४ |
| (३-३०) | ज्ञानपञ्चमीस्तवनम् (णाणपंचमीथवणं) | उपा.श्रीगुणरत्नगणी | ९८ |


**परिशिष्टाणि**


| | | |
|---|---|---|
| परिशिष्टं प्रथमम् | स्तोत्राणां वर्णानुक्रमेण सूचिः। | १०३ |
| परिशिष्टं द्वितीयम् | कर्तॄणां वर्णानुक्रमेण सूचिः। | १०६ |
| परिशिष्टं तृतीयम् | छन्दसां वर्णानुक्रमेण सूचिः। | १०८ |
| परिशिष्टं चतुर्थम् | देश्यशब्दानां वर्णानुक्रमेण सूचिः। | १०९ |
| परिशिष्टं पञ्चमम् | सम्पादनोपयुक्तहस्तप्रतीनां सूचिः। | १११ |
| परिशिष्टं षष्ठम् | सन्दर्भग्रन्थसूचिः। | ११२ |

॥ऐँ॥

## सम्पादकीयम्

सम्पादनेऽस्मिन् सानन्दमुपदीक्रियन्ते पूर्वमप्रकटितप्रायाणि त्रिपञ्चाशत्प्रमितानि स्तोत्राणि। तत्र परनिष्ठगुणप्रकर्षज्ञान जनकशब्दत्वं[1] भक्तिजनकशब्दत्वं वा स्तुतित्वमिति। भक्तिश्चाराध्यत्वावच्छिन्नं ज्ञानम्। भक्तिर्भजनं तदेकतात्पर्यबुद्धिरिति तु शङ्करानन्दभागवतः कैवल्योपनिषद्दीपिकायामाह। तेन भिन्नक्रियाप्रयुज्यमानत्वेन पारिभाषिकार्थभेदवतामपि स्तुति-स्तवन-स्तोत्रशब्दानामेकार्थकत्वमव्याहतम्। स्तोत्रेषु प्राधान्येनेष्टदेवतायाः स्तुतिर्विधीयते। मनःप्रसादसम्पादनद्वारेण भक्त्यतिशयाधायकत्वात् तस्याः प्रतिपत्तिपूजारूपत्वं ललितविस्तरादौ प्रतिपादितम्। इदमत्रावधेयम्—जैनदर्शने आराध्यस्य वीतरागत्वेन स्तुतेरपि साक्षात् परम्परया वा वीतरागतोद्देश्यकत्वमेवाभिप्रेतम्। अत एवोत्तराध्ययनेषु स्तुतेः ज्ञान-दर्शन-चारित्रबोधिलाभद्वारा कल्पविमानोपपत्तिफलकत्वं प्रतिपादितम्[2]। आचार्यश्रीसमन्तभद्रसूरयोऽपि स्तुतीनां प्रशस्तपरिणामोत्पादकत्वं कथयन्ति। तदुक्तम्—

*स्तुतिः स्तोतुः साधोः कुशलपरिणामाय स तदा। (स्वयम्भूस्तोत्रम् १२.१)*

आगमेषु आचाराङ्गसूत्रस्य उपधानश्रुताध्ययने सूत्रकृदङ्गसूत्रस्य वीरस्तवाध्ययने च श्रमणस्य भगवतो महावीरस्य स्तुतिर्दृश्यते। आवश्यकसूत्रेषु चतुर्विंशतिजिन-श्रुत-सिद्धस्तवादिरूपा स्तुतिरीक्ष्यते। आगमेतरसाहित्येऽधुना भगवता भद्रबाहुस्वामिना प्रणीतम् उपसर्गहरस्तोत्रं प्राकृतभाषायां प्राचीनतमम् (वीराद् द्वितीयं शतकम्, विक्रमपूर्वं तृतीयं शतकम्), श्रीमद्भिः मानदेवसूरिभिः विरचितं लघुशान्तिस्तोत्रं च संस्कृतभाषायां प्राचीनतमम् (विक्रमात् तृतीयं शतकम्) अस्तीति।

रचनाशैलीमाश्रित्य स्तोत्राणामनेके प्रकारा उपलभ्यन्ते। तद्यथा—

१) कानिचित् स्तोत्राणि गुणवर्णनरूपाणि भवन्ति। एतेषु भगवत इष्टदेवताया वा देहस्य चरितस्य गुणानां वा महिमा वर्ण्यते। तदुक्तं षोडशाधिकारप्रकरणे श्रीहरिभद्रसूरिभिः—

*पिण्डक्रियागुणगतैः स्तोत्रैश्च महामतिग्रथितैः। (९-६)*

भगवतः पूजा भवतीति शेषः। अत्र पिण्डः=शरीरम्, क्रिया = शारीरिकी चेष्टा, गुणाः= आन्तरिकी विशेषता। यथा भक्तामरस्तोत्रम्।

२) कानिचित् स्तोत्राणि आत्मनिन्दागर्भितानि भवन्ति। एतेषु प्राधान्येनात्मनोऽवगुणवत्त्वं प्रकटीक्रियते। यथा रत्नाकरपञ्चविंशतिका। आत्मनिन्दायाः स्वनिष्ठापकर्षज्ञानजनकत्वेन परिशेषात् परनिष्ठगुणप्रकर्ष-ज्ञानजनकत्व एव पर्यवसानात् स्तुतित्वमव्याहतम्।

३) कानिचित् स्तोत्राणि दार्शनिकवादप्रसाधनपराणि भवन्ति। एतेषु तार्किकीं शैलीमाश्रित्य स्वाभिमतसिद्धान्तस्य युक्त्याऽबाधितत्वं पराभिमतसिद्धान्तस्य वा युक्त्या बाधितत्वं प्रसाध्यते। यथा कलिकालसर्वज्ञाचार्यश्रीहेमचन्द्रसूरिविरचितम् अन्ययोगायोगव्यवच्छेदद्वात्रिंशिकाद्वयम्।

४) कानिचित् स्तोत्राणि मन्त्रमहिमगर्भितानि भवन्ति। एतेषु ऐहिकामुष्मिकादिफलसाधकानि मन्त्राक्षराणि भवन्ति। यथोपसर्गहरस्तोत्रं भगवता भद्रबाहुस्वामिना प्रणीतम्।

---

१ स्तुतिश्च गुणवत्तया ज्ञानजनकः शब्दः। कणादरहस्यं पद्मनाभमिश्रः।

२ थवथुइमंगलेणं भंते ! जीवे किं जणयइ? थवथुइमंगलेणं णाणदंसणचरित्तबोहिलाभं जणयइ। णाणदंसणचरित्तबोहिलाभसंपण्णे य णं जीवे अंतकिरियं कप्पविमाणोववत्तियं आराहणं आराहेइ। (२९.१४)

५) कानिचित् स्तोत्राणि आलङ्कारिककाव्यमयानि भवन्ति। एतेषु शब्दार्थाद्यलङ्काराणां श्लेषादीनां च प्रयोगो भवति। यथा आचार्यश्रीरामचन्द्रसूरिविरचिता द्वात्रिंशिकाः।

६) कानिचित् स्तोत्राणि पादपूर्तिरूपाणि भवन्ति। एतेषु कस्यचित् प्रचलितस्य काव्यस्य स्तोत्रादेर्वा वृत्तानामेकं पादमादाय तत्पूर्तिरूपं काव्यं विरच्यते। यथा महोपाध्यायश्रीसमयसुन्दरगणिरचितम् ऋषभभक्तामरस्तोत्रम्।

७) कानिचित् स्तोत्राणि सङ्कीर्णरूपाणि भवन्ति। यथा परमार्हत्कुमारपालभूपालविरचितं साधारणजिनस्तवनम्। एतेषु उपर्युक्ताः सर्व एव विषया यथायथं समाविष्टा भवन्ति।

तदेवं नैकविधां रचनाशैलीमनुसृत्य सहस्राधिकानि स्तोत्राण्युपलभ्यन्ते। पूज्याचार्यश्रीबोधिरत्नसूरिविनेयेन पूज्यमुनिप्रवरश्री विनयरक्षितविजयेन प्राचीनस्तोत्राणि सङ्कलयता प्रायो द्विसहस्राधिकं स्तोत्राणामुपलब्धम्। स्तोत्रेष्वेतेषु भाषावैविध्यमप्युपलभ्यते। बाहुल्येन संस्कृत-प्राकृतापभ्रंशभाषास्वेव विरचितानि स्तोत्राणि प्राप्यन्ते। अन्यच्च फारसीभाषायां पूज्याचार्यश्रीजिनप्रभसूरिभिः निबद्धं द्वादशपद्यप्रमाणं «अल्ला लाहि तुराहं» इत्याद्यारभमाणं स्तोत्रमेकमवचूर्या सह जैनस्तोत्रसन्दोहे मुद्रितमुपलभ्यते।

**मुद्रितस्तोत्राणि**

जैनस्तोत्राणामनेके मुद्रिताः सङ्ग्रहाः प्रकाशिताः सन्ति। तेषु केषाञ्चित् सूचिरत्र प्रस्तूयते।

१) प्रकरणरत्नाकरः द्वितीय-तृतीयौ भागौ।(सम्पादकः- भीमशी माणेकः,मुम्बई)

२) काव्यमाला प्रथम-सप्तमौ गुच्छौ।( निर्णयसागरमुद्रणालयम्, मुम्बई)

३) जैनस्तोत्रसन्दोहः प्रथम-द्वितीयौ भागौ। (सम्पादकः- मुनिश्रीचतुरविजयः। प्र. साराभाइ मणिलाल नवाब,वि.सं.१९८९)

४) जैनस्तोत्रसमुच्चयः प्रथम-द्वितीयौ भागौ। (सम्पादकः- मुनिश्रीचतुरविजयः निर्णयसागरमुद्रणालयम्, मुम्बई ।)

५) जैनस्तोत्रसङ्ग्रहः। प्रथम-द्वितीयौ भागौ। (प्रकाशिका- श्रीयशोविजयजैनग्रन्थमाला,वाराणसी।)

६) स्तोत्ररत्नाकरः। प्रथम-द्वितीयौ भागौ। (प्रकाशिका- श्रीयशोविजयजैनग्रन्थमाला,महेशाना।)

७) जैनस्तोत्रसञ्चयः। प्रथम-द्वितीय-तृतीयभागाः। (सम्पादकः- आचार्यश्रीमाणिक्यसागरसूरिः, प्र.-रमणलाल जयचंद मीठाभाइ कल्याणचंदनी पेढी, कपडवंज, वि.सं.२०१६)

८) Ancient Jain Hymns, Editor – Dr.Charalotte Krause ( Sindhia Oriental Series,No. २, Ujjain,१९५२) जर्मनदेशीययानया विदुष्या सम्पादितेऽस्मिन् सङ्ग्रहेऽष्टस्तोत्राणां ऐतिहासिकी पृष्ठभूमिका स्तोत्रसाहित्यस्य माहात्म्यावेदिका भूमिका च पठनीयास्ति।

९) कापडियोपाह्वरसिकलालपुत्रेण प्राज्ञवरश्रीयुतहीरालालेन नैकानि स्तोत्राणि सम्पाद्य आगमोदयसमिति(मुम्बई)संस्थया मुद्राप्य प्रकाशितानि।

१०) नवाबोपाह्वमणिलालपुत्रेण श्रीयुतसारालालेनापि बहूनि सटीकानि सचित्राणि समन्त्राणि सानुवादानि स्तोत्राणि सङ्कलय्य प्रकाशितानि।

प्राचीने कालेऽपि स्तोत्राणां सङ्कलनं प्रचलितमासीदिति विविधानां हस्तप्रतीनां तत्सूचिपत्राणां चावलोकनेन प्रतीयते। वैक्रमीये १५०५तमे वर्षे हिमांशुगणिसङ्कलितस्य स्तोत्रकोषस्य विषये जिनरत्नकोषे उल्लेख उपलभ्यते (पत्रम्-१४५)। तत्रान्येषामपि स्तोत्रकोषाणां सूचिः प्रदत्तास्ति (पत्रम्-४५३)।

प्राचीनेषु ग्रन्थभाण्डागारेषु असङ्ख्यानामप्रकाशितानां स्तोत्राणां हस्तप्रतय उपलभ्यन्ते तत्सूचिपत्रेषु तन्नामान्यपि दृष्टिपथं सहसैवागच्छन्ति।

## कृति-कर्ता-हस्तप्रत-परिचय

पठनसौकर्यार्थं जैनस्तोत्रसङ्ग्रहस्य त्रयः खण्डा उपकल्पिताः सन्ति। तत्र प्रथमे खण्डे एकोनविंशतिः संस्कृतस्तोत्राणि सन्ति। द्वितीये खण्डे चत्वारि प्राकृतस्तोत्राणि सन्ति। तृतीये खण्डे त्रिंशदपभ्रंशस्तोत्राणि सन्ति। यद्यपि तृतीये खण्डे केषाञ्चित् स्तोत्राणां भाषा प्राचीनगौर्जरीति प्रतिभासते तथाप्यपभ्रंशसामीप्यात् तेषामत्र समावेशः कृतः। खण्डशः सर्वेषां परिचयः प्रस्तूयते।

### (१) संस्कृतस्तोत्राणि।

**(१-१) सुप्रभाताष्टकम्—**प्रातरुत्थाय स्वकीयस्येष्टदेवस्य स्मरणं महते लाभाय भवति इति मन्वते आर्यमहाजनाः। अत एव प्रभाते स्मरणीयस्य दैवतस्य नाम्ना गर्भितानि नैकानि स्तुतिस्तोत्रादीनि रचनापथमागतानि। तेष्वन्यतममेतत् वसन्ततिलकाछन्दोबद्धैरष्टभिः वृत्तैरुपनिबद्धं सुप्रभाताष्टकं नाम वीतरागदेवस्तुतिगर्भितं स्तोत्रम्। स्तोत्रेऽस्मिन् अचिन्त्यमहिमशालिनं भगवन्तमर्हन्तं स्तुत्वा मम प्रभातं शोभनं सञ्जातमिति भावना प्रदर्शिता स्तुतिकृता। प्रासादिकशैल्यां सालङ्कृतेन शब्दविन्यासेन, अर्थविन्यासेन च आवर्जिष्यति विदुषां चेत इति मन्ये। कृतिरेषा पूर्वं प्रकाशिता वर्तते वा न वा इति न ज्ञायते। अस्याः कर्तृविषयेऽपि वक्तुं न पार्यते।

**हस्तप्रतपरिचयः—** लघुकृतेरस्याः हस्तप्रतिः श्री वर्धमानजैनआगममन्दिरस्थहस्तप्रतभाण्डागारतः परमपूज्याचार्यदेव-श्रीमद्-हर्षसागरसूरि-प्रेरणया उपलब्धा। अस्याः क्रमाङ्कः ५६९तमो वर्तते। कर्गदपत्रात्मिकाया अस्याः प्रतेः एकमेव पत्रमस्ति। पत्रे त्रयोदश पङ्क्तयः, प्रत्येकासु पङ्क्तिषु च सप्तचत्वारिंशद् अक्षराणि सन्ति। देवनागरीलिपौ लिखितान्यक्षराणि स्पष्टान्यत एव सुवाच्यानि सन्ति। प्रतेः लेखनकालो वैक्रमीयं १४७७तमं वर्षम्। हस्तप्रतिरेषा शुद्धप्राया इति तत्र विशिष्टा संशोधनापेक्षा नाभूत्। केवलमनुलेखनसम्भावनाजन्यत्वेन स्पष्टतया प्रतीयमानानामशुद्धीनां मूलपाठ एव परिमार्जनं विहितम्।

**(१-२) वीतरागस्तवनम् (वृषभजिनस्तवनम्)—** स्तवनेऽस्मिन् चतुस्सु अनुष्टुप्छन्दोबद्धश्लोकेषु भगवत आदिनाथस्य वृषभदेवस्यैकादशैर्विशेषणैः स्तुतिर्विहिता अज्ञातेन कर्तृणा।

**हस्तप्रतपरिचयः—**अस्य हस्तप्रतिः श्री वर्धमानजैनआगममन्दिरस्थहस्तप्रतग्रन्थागारतः परमपूज्याचार्यदेव-श्रीमद्-हर्षसागरसूरिप्रेरणया उपलब्धा। अस्याः क्रमाङ्कः ५१/७२तमः वर्तते। कर्गदपत्रात्मिकाया अस्याः प्रतेः सप्तत्रिंशत् पत्राणि सन्ति। आदिमं पत्रद्वयं नोपलभ्यते। अनवधानात् तत्स्थानेऽन्यस्या हस्तप्रतेरादिमं पत्रद्वयं योजितमस्ति। अन्तिमानि पत्राण्यपि नोपलभ्यन्तेऽतोऽपूर्णेयं हस्तप्रतिरिति अस्या लेखनकालादिविषयेऽपि वक्तुं न शक्यते। प्रत्येकस्मिन् पत्रे पञ्चदश(१५) पङ्क्तयः, प्रत्येकासु पङ्क्तिषु च त्रिपञ्चाशद् अक्षराणि सन्ति। देवनागरीलिपौ लिखितान्यक्षराणि स्पष्टान्यत एव सुवाच्यानि सन्ति। इतः परं लाघवार्थमेतस्याः प्रतेः आ७२ इति सञ्ज्ञा प्रदीयते। हस्तप्रतावेषा कृतिः ३१(अ)तमे पत्रे विद्यते।

**(१-३) वृषभदेवस्तवनम्—** दास्यभावरूपाया भक्तेरभिव्यञ्जिकमेतत् पञ्चदशश्लोकप्रमाणं स्तवनमञ्चलगच्छीयाचार्यश्रीजयकीर्तिसूरिशिष्यैः श्रीमद्भिः ऋषिवर्द्धनसूरिभिर्विरचितम्[१]। स्वप्ने वृषभदेवस्य दर्शनमवाप्यैतत् स्तवनं रचितमिति स्तवनस्यान्तिमे श्लोके सूरयो निर्दिशन्ति। श्रीमताम् ऋषिवर्द्धनसूरीणां भक्तिप्रधानानि जिनातिशयपञ्चाशिका-समस्यामहिम्नस्तोत्र-चैत्यवन्दनचतुर्विंशतिकादीनि स्तोत्राण्यपि उपलभ्यन्ते। विक्रमस्य १५१२तमे संवत्सरे चित्रदुर्गे (चित्तौड) गुर्जरभाषायां नलदमयन्तीरासोऽपि सूरिभिरेव निरमायि[२]। सूरिवराणां स्तोत्राणि अलङ्कारैर्मण्डितान्यपि सरलानि सन्त्यत एव सुखास्वाद्यानि वर्तन्ते।

**हस्तप्रतपरिचयः—**अस्य हस्तप्रतिः राजनगर(अमदावाद)स्थलालभाइदलपतभाइभारतीयसंस्कृतिविद्यामन्दिरे वर्तते। निरन्तरं प्राचीनकृतीनामन्वेषणे दत्तचित्तैः परमपूज्यमुनिप्रवरश्रीधुरन्धरविजयैः एतस्याः हस्तप्रतेः प्रतिकृतिः सम्पादनार्थं प्रदत्ता।

---

१ श्रीजयकीर्तिसूरीन्द्रशिष्यश्रीऋषिवर्द्धनः। तेने सर्वजिनेन्द्राणां स्तुतिमेतां महाफलाम्॥११॥ इति चैत्यवन्दनचतुर्विंशतिकान्ते।

२ संवत पनर बारोतेर वरसे, चित्रकूटगिरि नयर सुवासे,श्रीसंघ आदर घणइ। (नलदमयन्तीरास) राजस्थान का जैन इतिहास पत्र-१७१

अस्याः क्रमाङ्कः ३१६१८तमः वर्तते। इतः परं लाघवार्थमेतस्याः प्रतेः लाद इति सञ्ज्ञा प्रदीयते कर्गदपत्रात्मिकाया अस्याः प्रतेः एकमेव पत्रमस्ति। पत्रे एकोनविंशतिः पङ्क्तयः, प्रत्येकासु पङ्क्तिषु च द्वाषष्ठिः अक्षराणि सन्ति। देवनागरीलिपौ लिखितान्यक्षराणि स्पष्टान्यत एव सुवाच्यानि सन्ति। हस्तप्रतेरस्याः प्रान्तभागः खण्डितोऽतः कानिचिदक्षराणि न शक्यन्तेऽवलोकयितुमिति स्तवनस्य त्रुटितं पाठमञ्चलगच्छीयपरमपूज्याचार्यदेव-श्रीमत्-कलाप्रभसागरसूर्यवाप्तप्रेरणाः परमपूज्यमुनिप्रवरश्री-महोदय-सागरगणिवर्याः प्रपूरयामासुः। यद्यपि ग्रन्थागारस्य सूचिपत्रे एषा हस्तप्रतिः स्तोत्रत्रयमिति नाम्ना उट्टङ्किता तथाप्यत्र चत्वारि स्तोत्राण्युपलभ्यन्ते। तथा हि— भृगुकच्छनगरमण्डनश्रीमुनिसुव्रतस्वामि-स्तवनम्(१-५), विहरमान-जिनस्तवनम्(१-१८), वृषभदेवस्तवनम्(१-३), नगरकोटमण्डनचतुर्विंशति-जिनस्तवनम्(१-१६) च। सर्वेषां परिचयो यथाक्रममेव प्रस्तोष्यते।

**(१-४) शान्तिजिनस्तवनम्—** भगवतोऽतिशयादिवैभववर्णनात्मकं शब्दानुप्रासादिकलितं भुजङ्गप्रयात-वृत्तबद्धैकोनविंशतिश्लोकप्रमाणं स्तवनमिदं खरतरगच्छीय-परमपूज्याचार्यदेव-श्रीमत्-जिनकुशलसूरि-परम्परागताचार्यदेव-श्रीजिनोदयसूरि-शिष्यावतंसैर्विबुधवरैरुपाध्यायश्रीमेरुनन्दनगणिभिर्निरमायि। एतेषां सत्तासमयः वैक्रमीयपञ्चदशशतकस्य मध्यभाग इति तद्रचितजीरापल्लीपार्श्वनाथफागुनामक-प्राचीनगुर्जर-भाषाबद्धकाव्ये वैक्रमीयस्य १४३२तमवर्षस्य रचनासमयस्य दर्शनान्निश्चीयते। आ७२सञ्ज्ञिकायां हस्तप्रतावेषा कृतिः ३२(ब)तमात् पत्रादारभ्य ३३(अ)तमपत्रपर्यन्तं विद्यते। अस्यैव कर्तुः जीरापल्ल्यष्टकम् (१-१२) करहेटकपार्श्वजिनस्तोत्रम् (१-१३) चेति कृतिद्वयमत्र सम्पादितम्। उपाध्यायश्रीमेरुनन्दनगणिन एकत्रिंशत्कण्डिकामयं सीमन्धरजिनस्तवनमप्रकाशितमित्याभाति।

**(१-५) भृगुकच्छनगरमण्डनश्रीमुनिसुव्रतस्वामिस्तवनम्।** स्तवनेऽस्मिन्नष्टौ वृत्तानि दोधकच्छन्दस्यन्तिमं च पद्यं हरिगीतच्छन्दसि वर्तते। शेषं वृषभदेवस्तवने (१-३) उक्तप्रायम्।

**(१-६) अष्टप्रातिहार्यगर्भितपार्श्वजिनस्तवनम्** (१) भगवदतिशयनिरूपणपरैर्नानोपमानगर्भैस्त्रिभिः स्रग्धरावृत्तैः समेतं स्तवनमिदं श्रीपूर्णभद्रगणिभिर्विरचितम्। कर्तुरैतिह्यवृत्तं नावगतम्। आ७२सञ्ज्ञिकायां हस्तप्रतावेषा कृतिः ३१(ब) तमे पत्रे विद्यते।

**(१-७) अष्टप्रातिहार्यगर्भितपार्श्वजिनस्तवनम्** (२) अस्मिन् स्तवनेऽपि भगवतः प्रातिहार्याष्टकश्रियो व्यावर्णनं प्रभातीरागेण गीयमाने पद्यद्वये कृतमन्तिमं पुनर्मालिनीवृत्ते। कर्तास्याज्ञातः। आ७२सञ्ज्ञिकायां हस्तप्रतावेषा कृतिः ३१(ब)तमे पत्रे विद्यते।

**(१-८) पार्श्वजिनस्तवनम्** आचार्यश्रीअजितसिंहसूरिकृतं स्तवनमेतन्मुद्रितपूर्वं जैनस्तोत्रसन्दोहे (१४)तमम्, पत्रम्-(९०,९१)। एतत्स्तवनं मन्त्राक्षरगर्भितमस्ति। पुनश्चात्र ज्वरादीनामाधिभौतिकानां भूतादीनामाधिदैविकानां च बाधानां निवारणायोपाया अपि प्रदर्शिताः सन्ति। स्तवनमेतत् षड्भिरनुष्टुप्भिरेकेन च वसन्ततिलकावृत्तेन निबद्धम्। कर्तुरैतिह्यवृत्तं नावगतम्। आ७२सञ्ज्ञिकायां हस्तप्रतावेषा कृतिः ३०(ब) तमात् पत्रादारभ्य ३१(अ)तमपत्रपर्यन्तं विद्यते।

**(१-९) चिन्तामणिपार्श्वजिनस्तोत्रम्** पञ्चसु शार्दूलविक्रीडितानुष्टुबार्योपजातिच्छन्दःसु बद्धस्यैतस्य कर्तारः खरतरगच्छीयोपाध्यायाभयधर्मगणिशिष्या उपाध्यायश्रीकुशललाभगणिनः। सत्तासमयस्तेषां वैक्रमीयात् १६१६तमवर्षादारभ्य १६२४तमवर्षपर्यन्तः[१]। मारुगुर्जरभाषायां समवाप्तप्रसराया ढोलामारुचतुष्दिकायाः कर्तृत्वम् उपाध्यायश्रीकुशललाभगणिनः[२]। आ७२सञ्ज्ञिकायां हस्तप्रतावेषा कृतिः ३०(ब) तमे पत्रे विद्यते।

अस्या एव अन्या हस्तप्रतिः जैनविश्वभारतीसंस्थानस्थे हस्तप्रतभाण्डागारे वर्तते। क्रमाङ्कोऽस्याः ३८१९। पाठशोधने साहाय्यमभूदनया।

**(१-१०) पार्श्वजिनलघुस्तवनम्** (१) शार्दूलविक्रीडितस्रग्धराछन्दोबद्धेऽज्ञातकर्तृकेऽस्मिन् स्तवनेऽचिन्त्यमहिमशालिनः

१ आनन्दकाव्यमहोदधि-भाग-७ पत्र-१४३।

२ कर्तुर्विषयेऽधिकं ज्ञेयं લેખ કવિ કુશલલાભ લે. વાડીલાલ ચોક્સી, મધ્યકાલીન ગુજરાતી જૈન સાહિત્ય, પત્ર ૧૫૭, (સં.જયંત કોઠારી, કાંતિભાઇ બી. શાહ, પ્ર.મહાવીર જૈન વિદ્યાલય, ઇ.૧૯૯૩) पुस्तके वर्तते।

श्रीजीरापल्लीपार्श्वप्रभोः मन्त्रस्याक्षराणि गर्भितानि सन्ति। वृत्तान्यत्र त्रीणि। आ७२सञ्ज्ञिकायां हस्तप्रतावेषा कृतिः ३१(ब) तमे पत्रे विद्यते। अस्यान्या हस्तप्रतिः सागरगच्छीयोपाश्रयस्थित हस्तप्रतभाण्डागारे वर्तते। पू.प्र.श्रीजम्बूविजयैः कारिता प्रतिकृतिः आचार्यश्रीकैलाससागरसूरिज्ञानमन्दिरम्, कोबा इत्यत्र वर्तते। क्रमाङ्कोऽस्याः पाकाहेम-७३९६।

**(१-११) पार्श्वजिनलघुस्तवनम्** (२) आर्याछन्दोबद्धेऽज्ञातकर्तृकेऽस्मिन् स्तवने श्रीपार्श्वप्रभोः पदकमलम् स्तुतिगोचरतां नीतम्। वृत्तान्यत्र षट्। आ७२सञ्ज्ञिकायां हस्तप्रतावेषा कृतिः ३१(ब)तमे पत्रे विद्यते। अस्यान्या हस्तप्रतिः आचार्यश्रीकैलाससागरसूरिज्ञानमन्दिरम्,कोबा इत्यत्र वर्तते। क्रमाङ्कोऽस्याः-३९५१०।

**(१-१२) जीरापल्ल्यष्टकम्।** मालिनीछन्दोबद्धेऽस्मिन् स्तवने श्रीजीरापल्लीपार्श्वप्रभोः प्रभाववर्णनं वर्तते। कर्तृविषयेऽनुपदमेवोक्तम् (१-४) । आ७२सञ्ज्ञिकायां हस्तप्रतावेषा कृतिः ३२(ब)तमे पत्रे विद्यते।

**(१-१३) करहेटकपार्श्वजिनस्तोत्रम्।** वसन्ततिलकाछन्दोबद्धेऽस्मिन् स्तवने श्रीकरहेटकपार्श्वप्रभोः पिण्डक्रिययोर्वर्णनं वर्तते। वृत्तान्यत्र पञ्च। कर्तृविषयेऽनुपदमेवोक्तम् (१-४)। अनुसन्धानाभिधायां शोधपत्रिकायां (अङ्कः-५९, पत्रम्-१-२) जेसलमेरु दुर्गस्थजिनभद्रसूरिज्ञानभण्डारगत-हस्तप्रतेराधारेण पार्श्वकरहेटकस्तव इतिनाम्ना महोपाध्यायश्रीविनयसागरैः सम्पाद्य प्रकाशितम्। आ७२सञ्ज्ञिकायां हस्तप्रतावेषा कृतिः ३१(ब)तमे पत्रे विद्यते।

**(१-१४) स्तम्भनकपार्श्वजिनस्तवनम्।** स्तवनमेतद् यमकालङ्कारोपशोभितम्। वृत्तान्यत्र षट्। तत्र पञ्चसु स्रग्विणी छन्दोऽन्तिमे च शार्दूलविक्रीडितम्। उपाध्यायश्रीजयसागरगणिवरस्य कर्तुः परिचयो नोपलभ्यते। यद्यपि ऐतिह्यसन्दर्भग्रन्थेषु द्वयोरुल्लेखः प्राप्यते, तत्र प्रथमोऽज्ञातसमयोऽपरः पुनर्विज्ञप्तित्रिवेणीरचयिता खरतरगच्छीयाचार्यश्रीजिनकुशलसूरिपरम्परायामाचार्यश्रीजिनराजसूरिशिष्य उपाध्यायश्रीजयसागरगणी। समयोऽस्य वैक्रमीयात् १४७४तमवर्षादारभ्य १५०४तमवर्षपर्यन्तः[१] तथापि अस्य स्तवनस्य कर्तायमेवेति निश्चितं न शक्यते वक्तुम्। स्तोत्रसङ्ग्रहे उपाध्यायश्रीजयसागरगणिकृतानि त्रिणि स्तोत्राणि सम्पादितानि। एकमेतत्, गोडीपार्श्वजिनलघुस्तवनम् (३-१४), पञ्चमीमाहात्म्यगर्भितपार्श्वजिनलघुस्तवनम् (३-१९) च। आ७२सञ्ज्ञिकायां हस्तप्रतावेषा कृतिः ३१(ब)तमात् पत्रादारभ्य ३२(अ) तमपत्रपर्यन्तं विद्यते। संशोधनमस्यावश्यकम्।

**(१-१५) चतुर्विंशतिजिनस्तवनम्।** अज्ञातकर्तृकं चतुःसु आर्यासु शोभमानमिदं स्तवनम् आ७२सञ्ज्ञिकायां हस्तप्रतौ ३०तमे पत्रे विद्यते।

**(१-१६) नगरकोटमण्डनचतुर्विंशतिजिनस्तवनम्।** नगरकोट इति नगरमधुना कांगरानामकं तीर्थमित्यनुमीयते। भौगोलिककोशे तद्विषये एवमुक्तमस्ति यदुत बाणगङ्गा-मांझिनाम्न्योः नद्योः सङ्गमे वर्तमानं कोटकांगरानामकं कांगरा इति प्रचलिताभिधानं[२] पुरातनं नगरकोटनगरं वर्तते। नगरमेतत् कूलुतापराभिधत्रिगर्तदेशस्य पट्टनगरमासीत्। अस्य दुर्गो दुर्भेद्योऽवर्तत। महम्मदगिजनवीनाम्ना मुद्गला(मुघल)क्रमणकारिणोद्ध्वस्तानि अत्रत्यानि देवस्थलानि[३]। विज्ञप्तित्रिवेणीरचयित्रा उपाध्यायश्रीजयसागरगणिना उत्तरस्यां दिशि नगरकोट्टे वादिविजयः कृत[४] इत्युल्लेखाद् विक्रमस्य षोडशे शतके नगरमेतत् साधूनां विहारभूमिरासीदिति निःशङ्कम्। वैक्रमीये १४८४तमे वर्षे तेनैव रचितायां नगरकोटचैत्यपरिपाट्याम्

---

१ गुजरातीसाहित्यकोश, खंड-१ (मध्यकाळ) पत्र-११६। ऐतिहासिकजैनकाव्यसङ्ग्रह ( सं.-अगरचंद्र नाहटा,भंवरलाल नाहटा. प्र. शंकरदान नाहटा कलकत्ता, वि.सं.१९९४) पत्र-४०।

२ वर्तमानं कांगरा रावी-सतलजनद्योः सङ्गमे होंशियारपुरतः १२०कि.मी.दूरेऽस्ति। (૧૦૮ જૈનતીર્થ દર્શનાવલી, સં. પ્ર. મુનિશ્રી કુશળચંદ્રવિ.મ., પ્ર. ૧૦૮ જૈનતીર્થ દર્શન ભવન, સં.૨૦૫૨)

३ ભૌગોલિકકોશ ખંડ-૨, લે.ડાહ્યાભાઇ પીતાંબરદાસ દેરાસરી, પ્ર. ગુજરાત વર્નાક્યુલર સો.,સં.૧૯૯૫. પત્ર-૧૧૭

४ द्रष्टव्यम्- ऐतिहासिकजैनकाव्यसङ्ग्रह ( सं.-अगरचंद्र नाहटा,भंवरलाल नाहटा. प्र. शंकरदान नाहटा कलकत्ता, वि.सं.१९९४) पत्र-४०।

अत्र पञ्च जिनमन्दिराण्यासन्निति समुल्लेखः प्राप्यते[१]। अधुनात्र प्राचीनतमा श्रीवृषभदेवस्य प्रतिमा पूज्यमानास्ति[२]। श्रीऋषिवर्द्धनसूरिभिर्विरचितेन एतेन स्तवनेन तत्र चतुर्विंशतिजिनालयमासीदिति ज्ञायते। तच्च दशरथकृतमिति तत्रैव निर्दिष्टम्[३]। कर्तुः हस्तप्रतेश्च परिचयः पूर्वोक्त एव।

**(१-१७) चतुर्विंशतिजिनस्तुतिः।** चैत्यवन्दनचतुर्विंशतिकेति नाम्ना प्रसिद्धा। अस्यां स्तुतौ पञ्चविंशतिः उल्लासाः सन्ति। प्रत्येकस्मिन्नुल्लासे नवभिः श्लोकैरर्हतां लोकोत्तरा गुणसम्पद् व्यावर्णि स्तुतिकृता। सरलता मधुरता च स्तुतेरस्या वैशिष्ट्यम्। यद्यपि पूर्वमेषा स्तुतिः अञ्चलगच्छीयप्रतिक्रमणादिविधिपुस्तके मुद्रिता वर्तते तथापि तत्राशुद्धेर्बाहुल्यात् कतिपयश्लोकविस्मृतेश्च पुनःसम्पादनार्हत्वं मत्वात्र समाहिता। अस्या हस्तप्रतिः राजनगर(अमदावाद)स्थजैनज्ञानभाण्डागारे(संवेगीउपाश्रयः हाजापटेलप्रतोलिका) वर्तते। अस्याः क्रमाङ्कः ४६८४तमः वर्तते। कर्तुः परिचयः पूर्वोक्त एव।

**(१-१८) विहरमानजिनस्तवनम्।** (कर्ता आ.श्रीऋषिवर्द्धनसूरिः) स्तवनेऽस्मिन् प्रायशो गुर्जरभाषायां प्रयुज्यमानं हरिगीतच्छन्दसः दृश्यते। कर्तुः हस्तप्रतेश्च परिचयः पूर्वोक्त एव।

**(१-१९) पञ्चपरमेष्ठिस्तवनम्।** आचार्यश्रीजिनप्रभसूरिरचिते पञ्चपरमेष्ठिस्तवने पञ्चसु श्लोकेषु नमस्कारमहामन्त्रस्थितानां पञ्चानां परमेष्ठिनां नामग्राहं स्तवनम्, ध्यानप्रकारः, तत्फलं च व्यावर्णितम्। आचार्यश्रीजिनप्रभसूरिः लघुखरतरगच्छप्रवर्तकस्याचार्यश्रीजिनसिंहसूरेः प्रखरप्रतिभाशाली शिष्य आसीत्। सूरिवरेणानेन विविधतीर्थकल्प-विधिमार्गप्रपाप्रभृतयोऽनेके ग्रन्था व्यरचिषत। मन्त्रविद्यावतानेन साहिमहम्मद-(तुघलक)नामकः[४] शककुलीयः सुरत्राणोऽपि प्रत्यबोधि। सूरिवरेण प्रतिदिननवनवस्तवननिर्माणनियमेन सप्तशताधिकस्तोत्राणि निरमायि। पद्मावत्यवगततपागच्छोदयेन च तानि आचार्यश्रीसोमतिलकसूरये समर्पितानि। विस्तृतः परिचयोऽन्यत्रोपलभ्यत इति तत एवावगन्तव्यः। समयोऽस्य वैक्रमीयं चतुर्दशं शतकमिति[५]। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ ३१तमे पत्रे विद्यते।

## (२) प्राकृतस्तोत्राणि

**(२-१) कल्याणकतिथिगर्भितपार्श्वजिनस्तोत्रम्।** (कल्लाणगतिहिगब्भिअं पासजिणथुत्तं) यथानामास्मिन् लघुस्तोत्रे श्रीपार्श्वजिनस्य पञ्चानां कल्याणकतिथीनां तिसृषु आर्यासु वर्णनं विद्यते। कर्तास्याज्ञातः। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ ३३तमे पत्रे विद्यते।

**(२-२) स्तम्भनकपार्श्वजिनविज्ञप्तिः।** (थंभणगपासजिणविण्णत्ती) द्वाविंशतिसु आर्यासु

स्वापकर्षबोधाभिव्यक्तिरूपा स्तुतिरस्या विषयः। कर्तास्या अज्ञातः। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ १३(अ)तमात् पत्रादारभ्य १३(ब)तमपत्रपर्यन्तं विद्यते।

**(२-३) शाश्वतचैत्यस्तोत्रम्** (सासयचेइयथुत्तं) (१) अस्मिन् स्तोत्रे सप्तसु आर्यासु ऊर्ध्वाधस्तिर्यग्लोके वर्तमानानि शाश्वतचैत्यानि अस्तवीदज्ञातनामधेयः कर्ता। कृतिरेषा आ७२ सञ्ज्ञिकायां हस्तप्रतौ ३०(अ)तमे पत्रे विद्यते।

**(२-४) शाश्वतचैत्यस्तोत्रम्** द्वितीयस्याज्ञातकर्तृकस्य शाश्वतचैत्यस्तोत्रस्यापि स एव विषयः। अत्र त्रिचत्वारिंशत्सु आर्यासु अतीतानागत-वर्तमानजिनानाम्, त्रैलोक्यवर्तिशाश्वताशाश्वतचैत्यानां च स्तवनं वर्तते। अस्मिन् स्तोत्रे अष्टादश्या आर्याया अन्तिम

---

१ खरतरगच्छीयश्रीसाधुरंगगणिभिरगुर्जरभाषायां नगरकोटमण्डनश्रीआदीश्वरगीतं रचितमस्ति। नाहटोपाख्येन अगरचंदेन जैनसत्यप्रकाशे (ओक्टोंबर,१९४५) नगरकोट के तीन स्तवन और विशेष ज्ञातव्य इति लेख आलिखितः।

२ द्रष्टव्यम्-१०८ જૈનતીર્થ દર્શનાવલી, (સં. પ્ર. મુનિશ્રી કુશળચંદ્રવિ.મ., પ્ર. ૧૦૮ જૈનતીર્થ દર્શન ભવન, સં.૨૦૫૨) પત્ર-૧૭૫

३ नगरकोटवरनगरे दशरथकारितजिनभवने।

४ अयं हि विक्रमस्य १३८०तमे वर्षे राज्यमारूढः।

५ જૈન સાહિત્યનો સંક્ષિપ્ત ઇતિહાસ પારા-૬૦૨-૪, પત્ર- ૨૭૫,લે.મોહનલાલ દ. દેસાઇ, સં. આ.શ્રી વિ.મુનિચંદ્રસૂ., પ્ર. આ.શ્રીવિ.ૐકારસૂ.જ્ઞાનમંદિર, સુરત,સં.૨૦૬૨.

एकोनविंशतितमाया आर्यायाश्च पूर्वो भागो लेखकदोषवशाद् भ्रष्ट इति प्रतिभाति।[1] कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ १७(अ) तमात् पत्रादारभ्य १८(अ)तमपत्रपर्यन्तं विद्यते।

**(३) अपभ्रंशस्तोत्राणि**

अपभ्रंशभाषा संस्कृत-प्राकृतभाषावदेव प्राचीनतमा कथ्यते। यदुक्तं वाग्भट्टालङ्कारे—

**संस्कृतं प्राकृतं तस्यापभ्रंशो भूतभाषितम्। इति भाषाश्चतस्रोऽपि यान्ति काव्यस्य कायताम्॥ (२.१)**

अत्र अपिशब्दाद् मागध्याः शौरसेन्याश्च सङ्ग्रह इति तट्टीकाकृतः। तथा च—

**संस्कृतं प्राकृतं चैवापभ्रंशोऽथ पिशाचिका। मागधी शौरसेनी च भाषाः षट् सम्प्रकीर्तिताः॥**

पिशाचिकैव भूतभाषितम्।

अपभ्रंशभाषां पुनरेवं विवृणोति वाग्भट्टः—

**अपभ्रंशस्तु तच्छुद्धं यद्यद्देशेषु भाषितम्॥**

**यत्तेषु तेषु कर्णाट-पाञ्चालादिषु देशेषु शुद्धमपरभाषादिभिरमिश्रितं भाषितं सोऽपभ्रंशः। यस्मिन् देशे स्वभावतो या भाषोच्यते सोऽपभ्रंशो भवतीत्यर्थः।**

वाग्भट्टकृतकाव्यानुशासनस्य टीकाकृद् वादिराजोऽपभ्रंशस्य सप्तविंशतिः पिशाचिकायाश्च एकादश भेदाः सन्तीति कथयति। तत्र गौर्जरी संस्कृतशब्दप्रचुरा भवतीति दर्शयन्नाह—

**संस्कृताढ्या च गौर्जरी॥**

**रुद्रटकृतरुद्रटालङ्कारस्य संस्कृतं प्राकृतं चान्यदपभ्रंश इति त्रिधा॥ (२.११) इति श्लोकं विवृण्वन् नमिसाधुरपभ्रंशलक्षणं लोकज्ञेयं वदति। तदाह— तस्य च लक्षणं लोकादेव सम्यगवसेयम्॥**

व्याकरणमहाभाष्यकारः पतञ्जलिरपभ्रंशविषय एवमाह—

एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः। तद्यथा— गौरित्यस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशाः। अपभ्रंशशब्दोऽत्र विकारवाची।

अत ऐतिह्यानुसन्धातार एवमामनन्ति यद् अपभ्रंशभाषा ईसवीयद्वितीयशतकादपि (वैक्रमीयादपि) पुरातनास्ति।

अधुना तु अपभ्रंशभाषा जैनसाहित्यं विहायान्यत्र कुत्रचिदेव दृश्यते। कलिकालसर्वज्ञैराचार्यश्रीहेमचन्द्रसूरिवरैर्व्याकरणेन प्रतिष्ठापिता अपभ्रंशभाषा साहित्येऽपि गरीयसीं पदवीमाससाद[2]।

**(३-१) चतुस्त्रिंशदतिशयगर्भितवृषभजिनविज्ञप्तिः** (चौतीसअतिसयविनति) अस्यामर्हतां चतुस्त्रिंशदतिशयानां वर्णनं वर्तते। कर्तास्या अज्ञातः। वृत्तान्यत्रैकविंशतिः। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ २५(अ)तमात् पत्रादारभ्य २५(ब) तमपत्रपर्यन्तं विद्यते। स्तवनमेतन्मुद्रितपूर्वम्[3]। अशुद्धिबहुलस्यास्य केचन पाठभेदा अत्र गृहीताः। अनुसन्धानाभिधायां शोधपत्रिकायामपि (अङ्कः-५२, पत्रम्-५८-६२) जेसलमेरुदुर्गस्थ-हस्तप्रतेराधारेण सर्वजिन-चौतीसअतिसयविनति इतिनाम्ना महोपाध्यायश्रीविनयसागरैः सम्पाद्य प्रकाशितम्।

**(३-२) विचारस्तोत्रम्** (वियारथुत्तु) स्तोत्रमेतदात्मनिन्दागर्भितम्। अत्र प्राधान्येन त्रिभुवनवर्तिनां जीवानां वर्णनं वर्ततेऽतो जीवविचारगर्भित-शत्रुञ्जयमण्डन-ऋषभजिनस्तोत्रं यद्वा शत्रुञ्जयमण्डन-आदिनाथस्तवनमिति नाम्ना प्रसिद्धम्। एकविंशतिपद्यमयं

---

१ एता अनुसन्धानाभिधायां शोधपत्रिकायां (अङ्कः-५९, पत्रम्-७-१०) महोपाध्यायश्रीविनयसागरैः सम्पाद्य प्रकाशिताः।

२ संदर्भ— જૈન ગૂર્જર કવિઓ ભા.૧૦, લે.મોહનલાલ દ. દેસાઇ, સં.જયંત કોઠારી, પ્ર.મહાવીર જૈન વિદ્યાલય, ઇ.૧૯૯૭

३ सन्दर्भोऽस्य आचार्यश्रीकैलाससागरज्ञानमन्दिरात् प्राप्तः परन्तु पुस्तकनाम नोपलब्धम्।

स्तोत्रमिदम्। भाषास्य अपभ्रंशप्रधाना गौर्जरीत्यामनन्ति। कर्तास्य खरतरगच्छीयाचार्य-श्रीजिनकुशलसूरिशिष्य-श्रीविनयप्रभशिष्य-विजयतिलकोपाध्यायः। श्रीविनयप्रभः यदि प्रतिवर्षं कार्तिकशुक्लैकादश्यां सर्वत्र पठ्यमानस्य गौतमस्वामिरासस्य कर्तैव तदास्य समयः वैक्रमीयं चतुर्दशं शतकमिति। यतो गौतमस्वामिरासस्य रचनासमयो वैक्रमीयं १४१२तमं वर्षम्। तच्छिष्यस्य श्रीविजयतिलकोपाध्यायस्यापि समयः स एवेति वक्तुं सुशकम्। यद्यन्यः तदास्य स्तोत्रस्य वैक्रमीये १५५८तमे वर्षे लिखिताया हस्तप्रतेरुपलब्धेः तत्पूर्व इत्यनुमीयते। अस्य स्तोत्रस्य संस्कृतबालावबोधोऽप्युपलभ्यते।[१] कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ १३(ब)तमात् पत्रादारभ्य १४(ब)तमपत्रपर्यन्तं विद्यते। अन्यद् हस्तप्रतिद्वयं गुर्जरबालावबोधसहितम् आचार्यश्रीकैलाससागरसूरि ज्ञानमन्दिरम्,कोबा इत्यत्र वर्तते। क्रमाङ्कोऽनयोः २७५९, ६१४१९। स्तोत्रसङ्ग्रहे उपाध्यायश्रीविजयतिलकगणिकृतानि त्रीणि स्तोत्राणि सम्पादितानि। एकमेतत्, जीरापल्लीपार्श्वजिनविज्ञप्तिः (३-१०), सीमन्धरस्वामिविज्ञप्तिः (३-२४) च।

**(३-३) शान्तिस्तवजन्माभिषेकः।** (सिरीसंतिथोयजम्माभिसेउ) अस्मिन् स्तवनेऽणहिलपुरपत्तनवर्तिनः भगवतः श्रीशान्तिनाथस्य स्तुतिरस्ति। कर्तास्य अज्ञातः। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ १८(अ)तमात् पत्रादारभ्य १८(ब) तमपत्रपर्यन्तं विद्यते। अस्यान्यद् हस्तप्रतिद्वयम् आचार्यश्रीकैलाससागरसूरिज्ञानमन्दिरम्, कोबा इत्यत्र वर्तते। क्रमाङ्कोऽनयोः -०५२९६१,७८२८१।

**(३-४) शान्तिजिनविज्ञप्तिः।** (संतिजिणविण्णत्ती) मरुधरदेशे तलवाटक[२]नाम्नि पुरे विराजमानस्य भगवतः श्रीशान्तिनाथस्य स्तुत्यात्मकेऽस्मिन् स्तवने तत्रैव चैत्ये वर्तमानस्य भगवतः श्रीवीरस्वामिनोऽपि स्मरणमकरोत् स्तुतिकारः। वृत्तान्यत्र पञ्चदश। अस्य कर्ता खरतरगच्छीयाचार्य-श्रीजिनवर्धनसूरिशिष्याचार्यश्रीकीर्तिरत्नसूरिः। पितास्य देपाभिधो माता देवलदेवीनामा। अनयोः पुत्रो देल्हाभिधानो वैक्रमीये १४४९तमे वर्षे जातः। वैक्रमीये १४६३तमे वर्षे श्रीजिनवर्धनसूरिसमीपे दीक्षा। श्रीकीर्तिराज इति नाम। वैक्रमीये १४७०तमे वर्षे वाचनाचार्यपदं श्रीजिनवर्धनसूरिभिर्दत्तम्। वैक्रमीये १४८०तमे वर्षे उपाध्यायपदं श्रीजिनभद्रसूरिभिर्दत्तम्। वैक्रमीये १४९७तमे वर्षे जेसलमेरुदुर्गे आचार्यश्रीकीर्तिरत्नसूरिनामपूर्वं सूरिपदं श्रीजिनभद्रसूरिभिर्दत्तम् । वैक्रमीये १५२५तमे वर्षे वीरमपुरेऽनशनपूर्वं देहत्यागश्च। सूरिवरस्यैतिह्यं वृत्तं श्रीकीर्तिरत्नसूरिचतुष्पदिका(चोपाई)-फागु-गीतादिषु खरतरगच्छीयपट्टावल्ल्यादिषूपलभ्यते[३]। आचार्यश्री-कीर्तिरत्नसूरिभिः नेमिनाथकाव्यम्, नेमिनाथस्तवनम् (ज्ञानपञ्चमीगर्भितम्), चत्तारिअट्ठषडर्थाः, शान्तिनाथ-अन्यार्थस्तुतिरित्यादयः कृतयो विरचिताः[४]। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ २२(ब)तमात् पत्रादारभ्य २३(अ) तमपत्रपर्यन्तं विद्यते। स्तोत्रसङ्ग्रहे आचार्यश्रीकीर्तिरत्नसूरिकृतं स्तोत्रद्वयं सम्पादितम्। एकमेतत्, अपरं नेमिजिनविज्ञप्तिः (३-६) च। आचार्यश्री-कीर्तिरत्नसूरिभिः स्तोत्रद्वयमेतदाचार्यपदावाप्तिपूर्वमेव रचितमिति स्तोत्रान्ते कीर्तिराजनामदर्शनेनानुमीयते।

**(३-५) शान्तिनाथस्तवनम्।** (संतिणाहथवणं) सद्भावप्राप्तिप्रार्थनागर्भितं चतुर्विंशतिवृत्तबद्धं स्तोत्रम् इदम्। अस्य कर्ता उपाध्यायश्रीविनयप्रभः प्रतिवर्षं कार्तिकशुक्लप्रतिपदायां सर्वत्र पठ्यमानस्य गौतमस्वामिरासस्य कर्ता। वैक्रमीये १३८३तमे वर्षे श्रीजिनकुशलसूरिसमीपे दीक्षा। गौतमस्वामिरासस्य रचनासमयो वैक्रमीयं १४१२तमं वर्षम्। स्तवनाद्यन्ते बोधिबीज इत्यपरनाम्ना स्वोल्लेखः क्रियते कर्त्रा। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ २०(ब)तमात् पत्रादारभ्य २१(अ)तमपत्रपर्यन्तं विद्यते। स्तोत्रसङ्ग्रहे उपाध्यायश्रीविनयप्रभगणिकृतं स्तोत्रद्वयं सम्पादितम्। एकमेतत्, अपरं वीतरागविज्ञप्तिका (३-२७)

**(३-६) नेमिजिनविज्ञप्तिः** (णेमिजिणविण्णत्ति) अस्यां दशसु वृत्तेषु भवभ्रमणपीडानिवारणार्थं विज्ञप्तं कर्त्रा। कर्तुराचार्यश्रीकीर्तिरत्नसूरेः परिचयः पूर्वोक्त एव।। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ २३(अ)तमात् पत्रादारभ्य २३(ब) तमपत्रपर्यन्तं विद्यते।

---

१ संदर्भ— गुजरातीसाहित्यकोश, खंड-१ (मध्यकाळ) पत्र-४०१

२ अस्य पुरस्य विषये ज्ञातव्यं नोपलब्धं किञ्चित्।

३ द्रष्टव्य- ऐतिहासिकजैनकाव्यसङ्ग्रह भाग-१,२,३,४ ( सं.-अगरचंद्र नाहटा,भंवरलाल नाहटा. प्र. शंकरदान नाहटा कलकत्ता, वि.सं.१९९४)

४ एता अनुसन्धानाभिधायां शोधपत्रिकायां (अङ्कः-५९, पत्रम्-७-१०) महोपाध्यायश्रीविनयसागरैः सम्पाद्य प्रकाशिताः।

**(३-७) पार्श्वजिनस्तोत्रम्** (लघु) (पासजिणथुत्तं) प्रेमलक्षणाभक्तिप्रकाशकेऽस्मिन् स्तोत्रे सप्त चतुष्पदिकाः (चउपई) सन्ति। कर्तास्य उपाध्यायश्रीगुणरत्नगणी। गुजरातीसाहित्यकोशे चतुर्णां गुणरत्नाभिधानानां विदुषामुल्लेखो दृश्यते। तत्र प्रस्तुतकृतिकारः क इति निश्चितं वक्तुं दुःशकम्। अस्य पदनिर्णयोऽपि ‹इति श्रीपार्श्वलघुस्तोत्राणि। श्रीगुणरत्नोपाध्यायैः कृतानि॥› इति प्रशस्तिवाक्यं दृष्ट्वा विहितः। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ ३४(अ)तमात् पत्रादारभ्य ३४(ब)तमपत्रपर्यन्तं विद्यते। स्तोत्रसङ्ग्रहे उपाध्यायश्रीगुणरत्नगणिकृतानि चत्वारि स्तोत्राणि सम्पादितानि। एकमेतत्, पार्श्वजिनस्तोत्रम् (३-८), पार्श्वजिनस्तोत्रम् (३-९), ज्ञानपञ्चमीस्तवनम् (३-३०) च।

**(३-८) पार्श्वजिनस्तोत्रम्** (लघु) (पासजिणथुत्तं) पिण्डगतगुणाभिव्यञ्जकेऽस्मिन् स्तोत्रे सप्त वृत्तानि (श्रीशत्रुंजयतीरथ सार इत्येतेन रागेण गेयानि) सन्ति। कर्तुरुपाध्यायश्रीगुणरत्नगणिनः परिचयः पूर्वोक्त एव। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ ३४(अ) तमे पत्रे विद्यते।

**(३-९) पार्श्वजिनस्तोत्रम्** (लघु) (पासजिणथुत्तं) अस्मिन् स्तोत्रे मण्डोवरनगरस्थितपार्श्वप्रभोः स्तुतिर्वर्तते। कर्तुरुपाध्यायश्रीगुणरत्नगणिनः परिचयः पूर्वोक्त एव। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ ३४(ब)तमे पत्रे विद्यते।

**(३-१०) जीरापल्लीपार्श्वजिनविज्ञप्तिः** (जीरावल्लीपासजिनविण्णत्ती) अस्मिन् स्तोत्रे एकादशसु भुजङ्गप्रयातवृत्तेषु जीरापल्लीमण्डनपार्श्वप्रभोः प्रभावः प्रदर्शितः। कर्तुरुपाध्यायश्रीविजयतिलकगणिनः परिचयः पूर्वोक्त एव। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ ३३(ब)तमात् पत्रादारभ्य ३४(अ)तमपत्रपर्यन्तं विद्यते।

**(३-११) जीरापल्लीपार्श्वजिनविज्ञप्तिः** (जीरावल्लीपासजिनविण्णत्ती) अस्मिन् स्तोत्रे जीरापल्लीपार्श्वप्रभुराधिभौतिक दुःखापनयनार्थं प्रार्थितोऽज्ञातेन कर्तृणा। अस्मिन् स्तोत्रे दश चतुष्पदिकाः (चउपई) सन्ति। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ ३५(ब)तमात् पत्रादारभ्य ३६(अ)तमपत्रपर्यन्तं विद्यते।

**(३-१२) जीरापल्लीपार्श्वजिनस्तोत्रम्** (जीरावल्लीपासजिनथुत्तं) क्रियागतगुणाभिव्यञ्जकेऽज्ञात-कर्तृकेऽस्मिन् स्तोत्रे पञ्चदश वृत्तानि सन्ति। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ १५(ब)तमात् पत्रादारभ्य १६(अ)तमपत्रपर्यन्तं विद्यते। अस्यान्या हस्तप्रतिः आचार्यश्रीकैलाससागरसूरिज्ञानमन्दिरम्,कोबा इत्यत्र वर्तते। क्रमाङ्कोऽस्याः ०३३२५१।

**(३-१३) देवलवाडपार्श्वजिनलघुस्तोत्रम्** (देवलवाडपासजिनलहुथुत्तं) मेदपाटकदेशे वर्तमानस्य देवलपाटकनगरस्याधिपतेः पार्श्वप्रभोः स्तोत्रमिदम्। अस्मिन् सप्त वृत्तानि सन्ति। अधुनातने उदयपुरनगरसमीप-वर्तिनि देवलपाटके[1] त्रिणि चैत्यानि सन्ति। तत्र द्वयोः श्रीवृषभदेवो मूलनायकोऽस्ति। तृतीये च पार्श्वप्रभुः[2]। अस्य कर्तुरुपाध्यायश्रीसाधुनन्दनगणिविषये एतावदेव ज्ञायते यदयं वैक्रमीये षोडशे शतकेऽभूत्। उपाध्यायश्री-विनयप्रभ-विजयतिलकयोः समकालीनश्चासीत्[3]। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ ३४(ब)तमे पत्रे विद्यते।

**(३-१४) गोडीपार्श्वजिनलघुस्तवनम्** (गोडीपासजिनलहुथवणं) अस्मिन् स्तोत्रे सप्त वृत्तानि (श्रीशत्रुंजयतीरथ सार इत्येतेन रागेण गेयानि) सन्ति। कर्तुरुपाध्यायश्रीजयसागरगणिनः परिचयः पूर्वोक्त एव। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ ३६(अ)तमे पत्रे विद्यते।

**(३-१५) स्तम्भनकपार्श्वजिनस्तोत्रम्** (१) (थंभणयपासजिणथुत्तं) अज्ञातकर्तृकमात्मनिन्दावेदकं स्तोत्रमिदम् पञ्चसु वृत्तेषु निबद्धं द्रुतविलम्बितछन्दःसदृशेन रागेण गीयते। स्तवनस्य भाषा प्राचीनगौर्जरीति प्रतिभासते। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ ३५(अ)तमे पत्रे विद्यते। अस्यान्या हस्तप्रतिः आचार्यश्रीकैलाससागरसूरिज्ञानमन्दिरम्,कोबा इत्यत्र वर्तते। क्रमाङ्कोऽस्याः-२६९९०।

१ उदयपुरनगरत उत्तरस्यां दिशि सप्तदशमाइलदूरवर्ति देवलपाटकं वर्तते।

२ सन्दर्भः- जैनतीर्थसर्वसंग्रह, ભાગ-૧ ખંડ-૨, પ્ર.આણંદજી કલ્યાણજી પેઢી અમદાવાદ, સં.૨૦૧૦ પત્ર-૨૬૪

३ જૈન સાહિત્યનો સંક્ષિપ્ત ઇતિહાસ પારા-૭૪૪, લે.મોહનલાલ દ. દેસાઇ, સં. આ.શ્રી વિ.મુનિચંદ્રસૂ., પ્ર. આ.શ્રીવિ.ૐકારસૂ.જ્ઞાનમંદિર, સુરત,સં.૨૦૬૨.

**(३-१६) स्तम्भनपार्श्वजिनस्तोत्रम्** (२) (थंभणयपासजिणथुत्तं) अस्मिन् स्तोत्रे स्तम्भनपुरवर्तिपार्श्वप्रभुबिम्बस्येतिहासः कथितः। अज्ञातकर्तृकेऽत्र स्तोत्रेऽष्टौ वृत्तानि (श्रीशत्रुंजयतीरथ सार इत्येतेन रागेण गेयानि) सन्ति। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ ३५(अ)तमात् पत्रादारभ्य ३५(ब)तमपत्रपर्यन्तं विद्यते।

**(३-१७) फलवर्धिपार्श्वजिनस्तोत्रम्** (फलवद्धिपासजिणथुत्तं) मेदिनीपुर(मेडता)समीपवर्तिनि फलवर्धिग्रामस्थितपार्श्वप्रभोः अज्ञातकर्तृकं स्तोत्रमिदं द्रव्यपूजयावाप्तमानन्दमभिव्यनक्ति। एतच्च नवसु वृत्तेषु निबद्धं द्रुतविलम्बितछन्दःसदृशेन रागेण गीयते। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ ३४(ब)तमात् पत्रादारभ्य ३५(अ)तमपत्रपर्यन्तं विद्यते।

**(३-१८) वरकाणपार्श्वजिनस्तोत्रम्** (वरयाणपासजिणथुत्तं) राणीनगरसमीपवर्तिनि वरकनकनाम्नि प्राचीने नगरे स्थितस्य पार्श्वप्रभोः स्तोत्रमिदम्। अत्र स्तोत्रेऽष्टौ वृत्तानि सन्ति। श्रीसोमकुञ्जरगणी कर्तास्य खरतरगच्छीयोपाध्यायश्रीजयसागरगणिशिष्यः। समयोऽस्य वैक्रमीयं षोडशं शतकम्। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ ३५(ब)तमे पत्रे विद्यते।

**(३-१९) पञ्चमीमाहात्म्यगर्भितपार्श्वजिनलघुस्तवनम्** (पंचमीमाहप्पगब्भिअपासजिणलहुथवणं) अस्मिन् स्तवने ज्ञानस्य ज्ञानपञ्चम्याश्च महिमा व्यावर्णितः। वृत्तान्यत्र सप्त। कर्तुरुपाध्यायश्रीजयसागरगणिनः परिचयः पूर्वोक्त एव। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ ३६(अ)तमे पत्रे विद्यते।

**(३-२०) श्रीमहावीरजिनस्तोत्रम्** (सिरिमहावीरजिणथुत्तं) अज्ञातकर्तृकस्यास्य स्तोत्रस्य रचनाकालो वैक्रमीयं विंशत्यधिकं पञ्चदशं (वि.सं.१५२०) संवत्सरम्। रचनास्थलं च उपकेशपुरमित्यन्तिमे पद्ये उल्लिखितमस्ति। अत्र श्रमणस्य भगवतो महावीरस्य कल्पसूत्रानुसारि जीवनमतिसंक्षेपात् स्तुतिविषयीभूतम्। अत्र स्तोत्रे द्वात्रिंशद् वृत्तानि सन्ति। स्तोत्रेऽस्मिन् त्रयाणां छन्दसां प्रयोगो दृश्यते। तद्यथा-वस्तुछन्दः (५,११,१३,२४,२५,३०,३१) प्रभातीछन्दः (१-४,६-१०,१२,१४-२३,२६-२९) हरिगीतछन्दश्चेति (३२)। बहुधा एतान्यपभ्रंशभाषायां प्रयुज्यन्ते। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ २७(ब)तमात् पत्रादारभ्य २९(अ)तमपत्रपर्यन्तं विद्यते।

**(३-२१) चतुर्विंशतिजिनस्तवनम्** (१) (चउवीसजिणथवणं) अज्ञातकर्तृकेऽत्र स्तोत्रेऽष्टाविंशतिर्वृत्तानि सन्ति। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ २१(ब)तमात् पत्रादारभ्य २२(अ)तमपत्रपर्यन्तं विद्यते।

**(३-२२) चतुर्विंशतिजिनस्तोत्रम्** (२) (चउवीसजिणथुत्तं) अस्मिन् स्तोत्रे जेसलमेरुदुर्गे वर्तमानानामर्हतां स्तवनं वर्तते। अत्र स्तोत्रे पञ्चविंशतिर्वृत्तानि सन्ति। कर्तास्य श्रीराजकीर्तिनामकः श्रमणः। समयोऽस्य वैक्रमीयं षोडशं शतकम्। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ २२(अ)तमात् पत्रादारभ्य २२(ब)तमपत्रपर्यन्तं विद्यते।

**(३-२३) सीमन्धरस्वामिस्तोत्रम्** (सीमंधरसामीथुत्तं) सङ्कीर्णस्तोत्रमिदम्। अस्मिन् एकविंशतिर्वृत्तानि सन्ति। प्रभातीरागेण (कडखानी देशी) गीयन्तेऽन्तिमं हरिगीतच्छन्दसि वर्तते। कर्तास्य अज्ञातः तथापि स्तवनान्ते बोधिबीज इत्यपरनामदर्शनाद् उपाध्यायश्रीविनयप्रभः स्यादिति सम्भाव्यते। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ १६(अ)तमात् पत्रादारभ्य १६(ब)तमपत्रपर्यन्तं विद्यते।

**(३-२४) सीमन्धरस्वामिविज्ञप्तिः** (सीमंधरसामीविण्णत्ती) अस्मिन् स्तोत्रेऽष्टप्रातिहार्यवर्णनं वर्तते। स्तोत्रे सप्तदशवृत्तानि सन्ति भुजङ्गप्रयातच्छन्दसि च गीयन्ते। कर्तुरुपाध्यायश्रीविजयतिलकगणिनः परिचयः पूर्वोक्त एव। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ २५(ब)तमात् पत्रादारभ्य २६(अ)तमपत्रपर्यन्तं विद्यते।

**(३-२५) शत्रुंजयचैत्यपरिपाटीविवाहलो** (सेत्तुंजयचइत्तपरिवाडीविवाहलु) अस्मिन् स्तवने शत्रुञ्जयगिरिशिखरे शोभमानानां जिनप्रासादानां वर्णनं विद्यते। विवाहलउ इति काव्यप्रकारः प्राचीनगुर्जर-भाषायां व्याप्रियतेऽतोऽस्य स्तवनस्य समावेशोऽपभ्रंशभाषायां भवितुं नार्हति। विवाहलउ इति काव्यप्रकारो विवाहसमये गीयमानानां गीतानां विवाहमेव केन्द्रीकृत्य रचितानां काव्यानां वा प्राधान्येन भवति। तत्र भास-घात-ठवणिप्रभृतीनि वृत्तानि प्रयुज्यन्ते[१]।

---

१ संदर्भ— જૈનસાહિત્યના કાવ્યપ્રકારો સ્વરૂપ અને સમીક્ષા પ્રકરણ-૨ પત્ર-૪૦, લે. ડો. કવિન શાહ, પ્ર. શ્રુતનિધિ, અમદાવાદ, સં. ૨૦૬૪

स्तवनमेतन्मुद्रितपूर्वं द्विः, मोहनलालदलिचंददेसाइमहोदयेन, साराभाइमणिलालनवाबमहोदयेन च सम्पाद्य प्रकाशितम[1]। तत्र मोहनलालदलिचंददेसाइमहोदयेन सम्पादिता वाचना अशुद्धिबहुला वर्तते। उभयोरपि पाठभेदा अत्र गृहीताः। कर्तास्य अज्ञातः तथापि स्तवनान्ते सीमन्धर-जिनस्तोत्रान्त इवात्रापि विजयवंत इत्यक्षरदर्शनाद् उपाध्यायश्रीविजयतिलकः स्यादिति सम्भाव्यते। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ १४(ब)तमात् पत्रादारभ्य १५(ब)तमपत्रपर्यन्तं विद्यते।

**(३-२६) अष्टापदस्तवनम्** (अट्ठावयथवणं) अस्मिन् स्तवने अष्टापदपर्वतस्थितजिनप्रासादानां प्रासादिकं वर्णनमस्ति। स्तवनस्य भाषा प्राचीनगौर्जरीति प्रतिभासते। यतोऽत्र चउपइ-भासप्रमुखच्छन्दसां प्रयोगो दृश्यते। अस्मिन् स्तवने द्वापञ्चाशद् वृत्तानि सन्ति। कर्तुरुपाध्यायश्रीजयसागरगणिनः परिचयः पूर्वोक्त एव। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ ३६(ब)तमात् पत्रादारभ्य ३७(ब)तमपत्रपर्यन्तं विद्यते।

**(३-२७) वीतरागविज्ञप्तिका** (वीयरागविण्णतिया) सङ्कीर्णस्तवनात्मिकायामस्यां विज्ञप्तौ भुजङ्गप्रयातछन्दोबद्धानि त्रयोदश वृत्तानि सन्ति। स्तवनस्य भाषा प्राचीनगौर्जरीति प्रतिभासते। कर्तुरुपाध्यायश्रीविनयप्रभगणिनः परिचयः पूर्वोक्त एव। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ २१(अ)तमात् पत्रादारभ्य २१(ब)तमपत्रपर्यन्तं विद्यते।

**(३-२८) नन्दीश्वरचतुष्पदी** (नंदीसरचउप्पई) अज्ञातकर्तृकायामस्यां चतुष्पद्यां नन्दीश्वरद्वीपवर्तिनां शाश्वतचैत्यानां वर्णनमस्ति। अत्र एकादश वृत्तानि सन्ति। स्तवनस्य भाषा प्राचीनगौर्जरीति प्रतिभासते। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ २९(अ)तमे पत्रे विद्यते। अस्यान्यद् हस्तप्रतित्रयम् आचार्यश्रीकैलाससागर-सूरिज्ञानमन्दिरम्, कोबा इत्यत्र वर्तते। क्रमाङ्क एतासाम्-२२८७८, २६९९०,२९३३८।

**(३-२९) नन्दीश्वरस्तोत्रम्** (नंदीसरथुत्तं) अस्मिन् स्तवने नन्दीश्वरद्वीपस्थितजिनप्रासादानां वर्णनमस्ति। स्तवनस्य भाषा प्राचीनगौर्जरीति प्रतिभासते। यतोऽत्र चउपइ-वस्तु-भासप्रमुखच्छन्दसां प्रयोगो दृश्यते। अस्मिन् स्तवने पञ्चविंशतिर्वृत्तानि सन्ति। कर्तुः श्रीमेरुमुनेः परिचयः न प्राप्यते। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ ३६(ब)तमात् पत्रादारभ्य ३७(ब)तमपत्रपर्यन्तं विद्यते।

**(३-३०) ज्ञानपञ्चमीस्तवनम्** (णाणपंचमीथवणं) अस्मिन् स्तवने ज्ञानस्य पञ्चम्याश्च तिथेः महिमा प्रतिपादितः। अत्र मतिश्रुतज्ञानयोर्भेदानाम्, पञ्चम्यां तिथौ सञ्जातानां जिनकल्याणकानां च वर्णनमस्ति। अस्मिन् स्तवन एकविंशतिर्वृत्तानि सन्ति। स्तवनस्य भाषा प्राचीनगौर्जरीति प्रतिभासते। कर्तुरुपाध्यायश्रीगुणरत्नगणिनः परिचयः पूर्वोक्त एव। कृतिरेषा आ७२सञ्ज्ञिकायां हस्तप्रतौ २४(अ)तमात् पत्रादारभ्य २५(ब)तमपत्रपर्यन्तं विद्यते।

### सम्पादनप्रकारः

अत्राशुद्धत्वेनोपलक्षितः पाठः सम्माज्र्य तत्रैव वृत्ताकारे () कोष्ठके शुद्धः पाठो दर्शितः। यत्रापि च पाठे स्वल्पोऽपि सन्देहः तत्र प्रश्नचिह्नं कृतम्। लिपिकृतोऽनवधानादिना भ्रष्टः पाठः चतुष्कोणे [ ] कोष्ठके, पुनरावृत्तश्च पाठः धनुराकारे { } कोष्ठके न्यस्तः। सर्वथा सन्दिग्धाः पाठा अधोरेखयाङ्किताः। पाठसंशोधने तत्प्रपूर्तये च प्रार्थिताः पूज्यपंन्यासप्रवराः **श्रीमोक्षरतिविजयगणिवराः**, पूज्यमुनिप्रवराः **श्रीमहोदयसागरगणिवराः**, पूज्यमुनिप्रवरः **श्रीप्रशमरतिविजयः**, मुनिप्रवरः **श्रीराजसुन्दरविजयश्च** नितरां समुपचक्रुरिति।

### परिशिष्टाणि

परिशिष्टं प्रथमम्- स्तोत्राणां वर्णानुक्रमेण सूचिः।

परिशिष्टं द्वितीयम्- कर्तॄणां वर्णानुक्रमेण सूचिः।

परिशिष्टं तृतीयम्- छन्दसां वर्णानुक्रमेण सूचिः। अत्र अपभ्रंशे प्रयुज्यमानां केषाञ्चित् छन्दसां लक्षणावगमाभावात् त्रुटिर्वर्तते।

---

१ सन्दर्भोऽस्य आचार्यश्रीकैलाससागरज्ञानमन्दिरात् प्राप्तः परन्तु पुस्तकनाम नोपलब्धम्।

परिशिष्टं चतुर्थम्- देश्यशब्दानां वर्णानुक्रमेण सूचिः।

परिशिष्टं पञ्चमम्- सम्पादनोपयुक्तहस्तप्रतीनां सूचिः।

परिशिष्टं षष्ठम्- सन्दर्भग्रन्थसूचिः।

## कृतज्ञतावेदनम्

प्रस्तावेऽत्र सर्वस्मिन्नपि सम्पादनादिकार्यकलापे मामुपकाराभिवर्षणेनाप्लावितवतां परमगुरुवराचार्यवर्यश्रीमद्विजय-रामचन्द्रसूरीश्वराणां पितृगुरुमुनिप्रवरश्रीसंवेगरतिविजयानां, साहाय्यादिप्रदानेन चोपकृतवतो अनुजस्य मुनिप्रवरश्रीप्रशमरति-विजयस्य, मुनिप्रवरश्रीसंयमरतिविजयस्य, पूज्याचार्यश्रीमद्विजय-रामसूरीश्वरपट्टधरपूज्याचार्यश्रीमद्विजयाभयदेवसूरीश्वरशिष्य मुनिप्रवरश्रीजिनरत्नविजयशिष्यमुनिप्रवरश्री-प्रभुशासनरत्नविजयस्य, पूज्यसाध्वीश्रीहर्षरेखाश्रीशिष्या-साध्वीश्रीजिनरत्नाश्री-साध्वीश्रीमधुरहंसाश्री-साध्वीश्रीधन्यहंसाश्रीणां च सविनयं सादरमपि कृतज्ञतामावेदयामि।

सम्पादनेऽस्मिन् दृश्यमानाः छद्मस्थसुलभाः क्षतयो विद्वांसः सम्माक्ष्यन्ति निर्देक्ष्यन्ति चेति निवेदयन्, सर्वेषां विद्यागुरूणामनन्तोपकारान् स्मरन्, यथामति सम्पाद्यात्र प्रस्तुतान्येतानि स्तोत्राणि विदुषां बोधवृद्ध्यै बोधिशुद्ध्यै च सम्पद्यन्तामिति शुभमभिलषँश्च विरमति परमगुरुवराचार्यवर्यश्रीमद्विजयरामचन्द्रसूरीश्वराणां विनेयान्यतमः

श्रुतभवनसंशोधनकेन्द्रम्

विक्रमस्य द्विसहस्राधिकद्वासप्ततितमे वर्षे

**- वैराग्यरतिविजयः**

माघशुक्लतृतीयातिथौ

श्रुतभवनसंशोधनकेन्द्रस्य पञ्चमे स्थापनादिने

# अवगाहनम्

**- पू.पं. श्रीमोक्षरतिविजयगणिवरः**

---

हस्तलिखितानाम् अमुद्रितानां शास्त्रग्रन्थानां सर्वाङ्गसुन्दरं सम्पादनं बहुविधां सज्जतामपेक्षते। मुख्यरूपेण व्याकरणच्छन्दः-काव्य-शब्दकोषज्ञानम्, लिपिबोधः, स्वपरागमेतिहास-नीति-व्यवहार-कथासाहित्यादि ग्रन्थावगाहनं च। सम्प्रति स्वल्पाः पूज्यश्रमणश्रमणीभगवन्त एतादृशीं सज्जतां दधते। तेष्वप्यधिकतमाः पूज्यास्तु विभिन्नेषु शासनसेवाकार्येषु प्रवृत्ताः वर्तन्ते।

एवं स्थिते तर्कशास्त्रकृतकृत्यमतिर्गणिवर्यः श्रीवैराग्यरतिविजयः सत्स्वपीतरशासनसेवाकार्यकौशलेषु श्रुतसेवायाः सङ्कटविकटपथ एकाकी पथिक इव चलन्नन्दतीति निश्शङ्कं प्रशंसापात्रम्।

केचन श्रमणभगवन्तः श्रुतसेवायां संलग्नाः सन्ति, परन्तु गणिवर्येण तु समग्रं जीवनमेव श्रुतसेवायै समर्पितम्। तदिदमस्य श्रद्धानम्, साहसम्, दीर्घदर्शित्वं च पुनः पुनरनुमोदयामि। स्वल्पा एव पुण्यात्मान एतादृशस्य कार्यस्य महत्त्वं जानन्ति। दुःसहां कटिपीडामवगणय्य, सर्वात्मना समुद्यम्य नवनवोन्मेषशालिनीप्रकटिताप्रकटितपुरातनग्रन्थकलापकलितानि पुस्तकानि सम्पाद्य श्रीसङ्घस्य करकमलयोः समर्पयन् गणिवर्यः सफलां कुरुते स्वकीयविद्याम्। अनेन सम्पादितेषु पुस्तकेषु स्तोत्रसाहित्यमिव अष्टसाहस्रीतात्पर्यविवरणम् १-२, त्रिपुराभारतीस्तवः, नयामृतम्, पातञ्जलयोगदर्शनम्, बन्धशतकम्, मङ्गलवादसङ्ग्रहः, श्राद्धविधिकौमुदी, स्याद्वादपुष्पकलिका, भवभावनाप्रकरणम्, मनःस्थिरीकरणप्रकरणम्, प्रशमरतिप्रकरणम्, कल्पनिर्युक्तिः, सर्वसिद्धान्तस्तवः, योगकल्पलता, मुक्तिवादः, व्याप्तिपञ्चकमित्यादि विविधविद्याशाखासमलङ्कृतानि शास्त्राण्यपि सन्तीत्यहो! गणिवर्यस्य सर्वतोमुखं वैदुष्यम्।

प्रस्तुतपुस्तकप्रस्तावनापि गणिवर्यस्य विदग्धतायाः साक्षिणी। अत्रापि दृश्यतेऽस्य सम्पादनकौशलम्, वैदुष्यम्, परिपूर्णताग्रहः, ऐतिह्यबोधः, प्रारब्धकार्यनिष्ठा च। किञ्चिदपि नावशिनष्टि गणिवर्यः। दृश्यतामत्र प्रस्तावनायां प्रथमं तावत्

१) स्तुति-स्तोत्र-स्तवनानां तात्त्विकी व्याख्या, तार्किकी शैली च।

२) प्राचीनतमस्य प्राकृतस्तोत्रस्य संस्कृतस्तोत्रस्य च नामोल्लेखः।

३) स्तोत्राणां सप्तसु प्रकारेषु विभागीकरणम्।

४) मुद्रितामुद्रितानां प्राचीनस्तोत्राणामनुमानिता सङ्ख्या।

५) मुद्रितानां स्तोत्रसङ्ग्रहाणां सूचिः।

६) एतस्मिन् सङ्ग्रहे प्रकाश्यमानानां स्तोत्राणां परिचयः।

७) स्तोत्रकाराणां परिचयः।

८) हस्तलिखितस्तोत्रप्रतीनां च परिचयः।

सर्वमेतद् गणिवर्यः स्वयं प्रस्तावनायां सुष्ठु प्रस्तौति।

स्तोत्रमर्थात् परमात्मनो रूपसौन्दर्यस्य कल्पनाचित्रम्।

स्तोत्रमर्थात् परमात्मगुणानां प्रार्थनागर्भं प्रशंसाचित्रम्।

स्तोत्रमर्थात् परमात्मन उपकाराणां स्मृतिचित्रम्।

स्तोत्रमर्थात् परमात्मस्वरूपस्य शब्दचित्रम्।

स्तोत्रमर्थात् परमात्मप्रभावस्य प्रभावशालिचित्रणम्।

स्तोत्राणि तु परमात्मभक्तेः परममालम्बनम्।

स्तोत्राणि तु परमात्मध्यानस्य प्रथमं सोपानम्।

स्तोत्राणि तु परमात्मनः प्रसन्नताया अनुपमोपायः।

स्तोत्रगानस्य मङ्गलवेलायामाविर्भूयमानानुभूतिः स्वसंवेदनसिद्धा सर्वेषां परमात्मभक्तानाम्। तथाहि—

नरीनृत्यति हृदयम्, मुखे विकसति स्मितम्।
आनन्दाश्रूणि वर्षन्ति, सर्वाङ्गः पुलकोद्गमः॥१॥

परमात्मा स्वयं साक्षादवतीर्णो ममान्तिकम्।
वहते करुणाधारा, सततं तस्य नेत्रयोः॥२॥

तस्याममृतधारायाम्,, स्नायं स्नायं पुनः पुनः।
पवित्रयामि गात्राणि, स्वान्तमात्मानमक्षिणी ॥३॥

साफल्यं लोचनयोः, सफलान् कायामनोवचनयोगान्।
प्रभुसङ्गमेन मन्ये, सार्थक्यं जीवितव्यस्य ॥४॥ आर्या॥

परिसीमा सन्तृप्तेरुपशमपीयूषपानजनितायाः।
अनुभूयतेऽत्र सन्ततमभूतपूर्वा मया भगवन्! ॥५॥

ईदृशीं कामपि संवेदनामनुभूय तां ग्रन्थस्थां  विदधानानां कविहृदयानाम्, बहुश्रुतानाम्, परमात्मैकलीनसमग्रचैतन्यानाम्, विद्वद्वरेण्यानाम्, विशुद्धचारित्रगुणसम्पन्नानां शब्देषु भक्तिचेतना परिस्फुरति। पठितमात्रमिदं साहित्यं स्पृशत्यात्मानम्। समुत्कण्ठते च मनः शेषाणामप्यप्रकाशितकृतीनां रसास्वादाय।

प्रस्तुते स्तोत्रसङ्ग्रहे सर्वाण्यपि स्तोत्राणि हृदयङ्गमान्येव, तथापि ममात्मनि स्थिरीभूतानि कानिचनात्र निर्देशयामि। (१.३.३)[१] (१.३.९) (१.३.१५) (१.११ सम्पूर्णम्) प्रथमे विभागे सप्तदशमे स्तोत्रे (५.८) (६.३) (१८.२) (२०.८) (२३.४) (२३.८) (२४.२)

प्रार्थ्यते प्रकामं पाठकगणः परिश्रमं सफलीकर्तुं कविवर्याणां गणिवर्यस्य च। प्रार्थ्यते निकामं गणिवर्यः शेषाण्यपि शतानि स्तोत्राणि सम्पादयितुम्।

**- मोक्षरतिविजयः**

वि.सं.२०७२, ज्येष्ठ शुक्ला षष्ठी

नडियाद, गुजरात.

१. (विभागः/स्तोत्रक्रमाङ्कः/पद्यक्रमाङ्कः)

(१)

# संस्कृतस्तोत्राणि

## (१.१)
## अज्ञातकर्तृकम्
# ॥सुप्रभाताष्टकम्॥
## (वसन्ततिलका)

सर्वज्ञ! सर्वहित! सर्वद! सर्वदर्शिन्!, सर्वार्थवाग्विभव! बोधितसर्वसत्त्व!।
नित्यं चतुःसुरनिकायकृतांह्रिसेव!, दृष्टोऽसि देव! मम सम्प्रति सुप्रभातम्॥१॥

लोकत्रयीनयनषट्पदपीयमानलावण्यसान्द्रमकरन्दरसं सुहृद्यम्।
दृष्टं जिनेश! भवतो वदनारविन्दमानन्दकारि! मम सम्प्रति सुप्रभातम्॥२॥

अभ्रूविलासमतरङ्गितहावभावमभ्रान्ततारकमचञ्चलपक्ष्ममालम्।
दृष्टं प्रसन्नशुचिलोचनचञ्चरीकयुग्मं तवेश! मम सम्प्रति सुप्रभातम्॥३॥

उत्तानपाणिचरणं तव मोक्षलक्ष्मीविस्तीर्णपद्मशयनासनसन्निवेशम्।
पद्मासनं मदनमर्दनयन्त्रकल्पं दृष्टं महेश! मम सम्प्रति सुप्रभातम्॥४॥

घोणाग्रसङ्घटितदृष्टिरकम्प्रमूर्तिशान्ताशमोदयमुदारमुदीरयन्ती।
दृष्टा प्रमोदपदवी तव योगमुद्रा योगीन्द्रनाथ! मम सम्प्रति सुप्रभातम्॥५॥

सेवागतानतसुरेन्द्रकिरीटकोटिरत्नोल्लसत्किरणकुङ्कुममञ्जरीभिः।
अभ्यर्चितं चरणयोर्युगलं तवाद्य दृष्टं शरण्य! मम सम्प्रति सुप्रभातम्॥६॥

किङ्किल्लिभावलयचामरचारुपीठदिव्यध्वनित्रिदशदुन्दुभिनादहृद्यः।
छत्रत्रयीतिलकितः सुरपुष्पकीर्णो दृष्टस्त्वदीयमहिमा मम सुप्रभातम्॥७॥

दृष्टं मुमुक्षुमुनिवृन्दमुखोपदिष्टधर्मामृतश्रवणनिर्वृतभव्यलोकम्।
देव! त्वदायतनमायतनादघण्टाटङ्कारहारि मम सम्प्रति सुप्रभातम्॥८॥

प्रातर्जिनं प्रतिदिनं मनसि स्मरन्तो ये सुप्रभातमिदमस्खलितं पठन्ति।
ते सर्वदैव दिवसान् परमप्रमोदकल्याणकल्पितगुणान् गुणिनो नयन्ति॥९॥

**॥इति श्रीमज्जिनेश्वरस्य सुप्रभाताष्टकं कल्याणकारि समाप्तम्॥**[१]

---

१ प्रतिलेखकप्रशस्ति-संवत् १४७७ वर्षे लिखितम्॥ भद्रं भूयात्॥ श्री॥

## (१.२)
### अज्ञातकर्तृकम्
## ॥वीतरागस्तवनम्॥
### (वृषभजिनस्तवनम्)
### (अनुष्टुप्)

विजयस्व जगन्नाथ! परमात्मन्! वृषध्वज!।
कृतकर्मारिसंहार(र!) स्त्रि(त्रि)दोषत्रिपुरान्तिका(क!)॥१॥

विजयस्व परब्रह्मन्! परमेष्ठिन्! पितामह!।
जगत्त्रयीज्ञानमह्यां सृष्टौ सृ(स्र)ष्टा त्वमेव हि॥२॥

विजयस्व केवलिश्रीविभागसुभग! प्रभो!।
विश्वरक्षाभयधृतोच्चैः स्कन्दपुरुषोत्तमः(म!)॥३॥

सर्वविद्यामन्त्रबीजाक्षरनामाक्षर! प्रभो!।
श्रीवीतराग! मे ध्येयः स्यात्त्वमेव भवे भवे॥४॥

## (१.३)
## आ.श्रीऋषिवर्द्धनसूरिरचितम्
# ॥श्रीवृषभदेवस्तवनम्॥
### (अनुष्टुप्)

जय त्वं नाभिभूपालकुलपङ्कजभानुमान्!। [श्री] आदिदेवदेवेश! स्थिरतामेरुसानुमान्!॥१॥

तव सेवां समीहन्ते नायका नाकिनामपि। वार्ता मनुजमात्राणां का च [त]दनुजन्मनाम्?॥२॥

यथा मुग्धहृदो मातुस्त्वया दत्तं शिवं सुखम्। तथा ममापि देहि त्वं वीतरागोऽसि चेद् विभो!॥३॥

रागद्वेषादयो विश्वविश्वोच्चाटकराः कथम्। त्वया हता द्विषस्तातोपायं ज्ञापय मेऽपि तम्॥४॥

पिता त्वं च मे माता शिशुस्तेऽहं च सेवकः। मुक्तिकन्याविवाहं मे कारयाशां च पूरय॥५॥

धनी दाता दयालुस्त्वं प्राप्तोऽस्यद्य कथञ्चन। निर्लज्जो याचकोऽहं त्वं [प्रयच्छ हि] म[द]र्थित[म्]॥६॥

भ्रामं भ्रामं भवाम्भोधिं मया लब्धोऽसि पोतवत्। पारं नय निमज्जन्तं मा मां मुञ्च कृपां कुरु॥७॥

अनुभूतं पुरा दुःखं भवभ्रमणजं स्वयम्। जानन्नु[पेक्षसे किं] मां ततः सदय! मोचय॥८॥

भृत्यचिन्तां विधायैव सुखं भुङ्क्ते सुठक्कुरः[१]। प्राप्तोऽपि शिवसाम्राज्यं चिन्तां किं कुरुषे न मे?॥९॥

यद्रागद्वेषमोहाद्यैः कृतं [हि दुष्]कृतं मया। त्वन्नामस्मरणेनाऽऽशु प्रलयं यातु तन्मम॥१०॥

देवस्त्वमेव च गुरुस्त्वमेव त्वदुदीरितः। धर्मो मे शरणं स्वामिन्! भूयाज्जन्मनि जन्मनि॥११॥

तव नामाङ्घ्रिध्यानानां मज्जिह्वाभालचेतसाम्। मा भूदत्र परत्रापि विरहः स्पृहयाम्यदः॥१२॥

पाहि मां पाहि मां तात! पाहि मां पाहि मां प्रभो!। सेवकः सेवकोऽहं ते सेवकः सेवकोऽस्मि ते॥१३॥

राज्यादिभिर्न मे कार्यं तव सेवैव मे प्रिया। वासवा अपि दासन्ति सेवाहेवाकितां हि ते॥१४॥

इति स्वप्नानुसारेण ऋषिवर्धनसूरिभिः। स्तुतः श्रीऋषभस्वामी सर्वसिद्धिं प्रयच्छतात्॥१५॥

**॥इति श्रीवृषभदेवस्तवनं श्रीऋषिवर्धनसूरिभिः कृतम्॥**

---

१ गामधणी

(१.४)

उपाध्यायश्रीमेरुनन्दनगणिरचितम्

## ॥शान्तिजिनस्तवनम्॥

(भुजङ्गप्रयातम्)

शिवश्रीवरं चङ्गसारङ्गवासम्, मुखश्रीपराभूतसारङ्गवासम्।
जिनाधीशचक्रीशसारङ्गवासम्, स्तुवे शान्तिनाथं सुसारङ्गवासम्॥१॥

विशाली गुणाली विभो! तावकीना, तनिष्ठा वराकी मतिर्मामकीना।
तयोः सङ्गतं सङ्गतं किं विधिज्ञोपमानेन भूजानि-भिक्षाटकन्ये॥२॥

तथापीह या सङ्गतिस्तत्र देव!, श्रये कारणं प्राग्भवाभ्यास एव।
यतः श्रूयते प्रेमदानादि सर्वम्, सदभ्यस्तमभ्येति जन्मान्तरेऽपि॥३॥

अतस्तात! विख्यातकारुण्यसिन्धो!, महाकेवलज्ञानविश्वैकबन्धो!।
गुणानां ततौ संस्तवं ते विपङ्कम्, विधत्तां मदीया मतिर्मुक्तशङ्कम्॥४॥

महाकीर्तिकल्लोलमालातिधान्ते, दुरालोकमध्ये प्रभावाम्बुधौ ते।
अपि स्फारसारस्वतोरुप्रवाह(हे)न लक्षा विशन्तः प्रभो! वेगगाहाः॥५॥

स मे आचिरेयः श्रियः प्रातु पृथ्वीर्यदङ्गप्रभामिश्रिता भाति पृथ्वी।
प्रभोर्दृष्टिपीयूषधाराभिरेव, ध्रुवं स्वर्णपुष्पोच्चयैः पुष्पितेव॥६॥

त्वयीशाम्बिकागर्भगे कान्तिपुण्ये, दिनाधीश्वरे वोदयस्थेति ज(जा?)ने।
प्रलीनाशिवे भूतले शान्तिलासः, पयोजे यथा नष्टनिद्रे विकाशः(सः)॥७॥

महीमण्डले तावकीनावतारे, जनातङ्कदाशान्तिवल्लीतु(कु)ठारे।
पुरोगामिनी वावतीर्णाऽत्र शान्तिस्ततो नामतो गीयसे देव! शान्तिः॥८॥

इदं सत्यमस्या मनुष्याक्षिलक्षा, अभूवन्न(न्नाथ!) सिद्धिश्रियो रूपलक्षाः।
चतुःषष्टिरामासहस्राणि सद्यस्त्वया मेनिरे यत्कृतेनैव हृद्य!॥९॥

स्फुटं तात्त्विकी वीरमाताचिरासौ, वरीवृत्यते कामिनीलोकराशौ।
यदीयाङ्गजः साधुयित्वा द्धि(द्वि?)धारम्, ललौ द्विप्रकारं क्षमायाः सुसारम्॥१०॥

महाशीलसन्नाहसञ्जातरक्षः, क्षिपन्वैरिवारं धराचारुदक्षः।
प्रदृष्टोऽसि यैः कर्मनिर्माथज(य?)ज्ञे, पवित्राणि नेत्राणि तान्येव मन्ये॥११॥

अशोकादिपूजाविधिभ्राजमानम्, चतुर्द्वारशालत्रयीशालमानम्।
दिशन्तं चतुर्द्धा वृषं ये भवन्तम्, स्मरन्ति द्रुतं भिन्दते ते भवन्तम्॥१२॥

यदालोकनं लोचने सौधवर्षम्, निपीय स्थिते निर्निमेषे सहर्षम्।
कलाकेलिदावावलीशान्तिपाथः, स मां पातु संसारतः शान्तिनाथः॥१३॥

कुदेवार्कपादार्तसन्तापथोरौ, चिराल्लब्धकामौ दृशौ मे चकोरौ।
रमेतामिहाहर्निशं नाथ! शान्ते!, त्वदीयानने यामिनीजानिकान्ते!॥१४॥

विभो! सापि सद्धर्मचक्रेण रम्या, विभो! सापि गोपालचक्रानुगम्या।
विभो! सापि निस्सीमबुद्धिप्रधाना, विभो! सापि वर्ण्या सदा सन्निधाना॥१५॥

विभो! सापि लोकत्रयैकातपत्रा, विभो! सापि लीलावलाशोकपत्रा।
विभो! सापि सौभाग्यभूपण्यकान्ता, विभो! सापि नानाविहारप्रशान्ता॥१६॥

घनं किं विभो! पश्य धृत्वा ममत्वम्, तया मे गुणैरस्ति सर्वैः समत्वम्।
कुतो मां विहाय स्फुटस्नेहसाराम्, त्वमासेवसे तां गलन्मोहधाराम्॥१७॥

मनोहारिरामावली वा दुदम्भा, हृदन्तीति चक्रीन्दिराभाग्यरम्भा।
जिनश्रीकृते येन मुक्ता सहेलम्, स मे रातु शं शान्तिनाथोऽनुवेलम्॥१८॥

मयैवं नुतः षोडशस्तीर्थनेता, शुभाचारिभावारिभावारिजेता।
महामेरुनन्दन्नवीनप्रभो! मे, वरीकर्तु शीघ्रं स्वतुल्ये प्रभो! मे॥१९॥[१]

१ अत्र लेखनप्रशस्तिः– ॥श्रीशान्तेः स्तवनम्॥ इति त्रीणि स्तवनानि मेरुनन्दनोपाध्यायैः कृतानि॥

(१.५)

श्रीऋषिवर्द्धनसूरिभिः कृतम्

## ॥भृगुकच्छनगरमण्डनश्रीमुनिसुव्रतस्वामिस्तवनम्॥

(दोधकवृत्तम्)

सुरसमुदयसेवितपदकमलं त्रिभुवनजनपूरितशुभकमलम्।
प्रणमामि विशुद्धविवेकमलं मुनिसुव्रतजिनमकलङ्कमलम्॥१॥

नवनीर[द]चकचिकरणम्(चाकचकीकरणम्) स्ववशीकृतदुर्जयतमकरणम्।
समहिमहरिवंशाऽलङ्करणं यशउदयविजयमङ्गलकरणम्॥२॥

अविकलकेवलकमलासकलं मधुमधु[रि]मवाणीविलासकलम्।
वदनेन जयन्तमलं सकलं शशिनं वशिमानसहंसकलम्॥३॥

अकठिनक{म}ठाङ्कितवरचरणं भवपरिभवभञ्जनपरिचरणम्।
अनु[पम]शमदमसङ्गमचरणं पुरतः सुरताडितपञ्चरणम्॥४॥

भृगुकच्छनगरनरवरमहितं क्रतुरङ्गतुरङ्गमपरमहितम्।
गतवन्तमनुत्तरधामहितं परिभूय मनोभवभटमहितम्॥५॥

नतदत्तनरेशसुरासुरतं रविमण्डलसमतनुभासुरतम्।
परमामृतधर्मकथासुरतं परिदूरितदुरितादरसुरतम्॥६॥

निजजन्मविभासितभर[सर]सं शारदशशिशीतलशान्तरसम्।
मन्दरभूधरसमधिकतरसं सुकृताङ्कुरभरजीमूतरसम्॥७॥

तमसामपनयने रविमुदितं सत्कृपोपेक्षा मैत्री मुदितम्।
निर्विषयविषातुषसुखमुदितं लयकलनकलाऽऽसादितमुदितम्॥८॥

इति धाममित्रश्रीसुमित्रक्षत्रियाधिपनन्दनः
पररूपपद्मारूपपद्माकुक्षिभूरानन्दनः।
शमसुव्रतः श्रीसुव्रतः श्रीसञ्चयं तनुतादयं
देवः स्तुतो मम वस्तुतोऽमम नायकः परमोदयम्॥९॥(हरिगीतम्)

**॥इति श्रीमुनिसुव्रतस्वामिस्तवनं श्रीऋषिवर्द्धनसूरिभिः कृतम्॥**

## (१.६)
## श्रीपूर्णभद्रगणिकृतम्
# ॥अष्टप्रातिहार्यगर्भितपार्श्वजिनस्तवनम्॥

**(स्रग्धराछन्दः)**

छत्रं भेर्यंशुबिम्बं प्रवरमणिमृगेन्द्रासनं चामरे द्वे,
सद्वाणी पुष्पवृष्टिर्बकुलतरुरमीभिस्स्तुवे पार्श्वदेवम्।
रेजे यस्यातपत्रं शरदिजरजनीजानिबिम्बोपमानम्,
भेर्याकाशे रसन्ती जिनमुखवचनं श्रोतुमाह्वास्त दूरात्॥१॥

पृष्ठे भामण्डलोऽभाद्गगनमणिरिवोद्दामधामा सुवृत्तो,
रत्नस्वर्णीननाथासनवरमशुभन्मेरुवत्तुङ्गशृङ्गम्।
गङ्गासिन्धुद्वयं वा सितचमरयुगं सेवितुं देवमागाद्,
वाणी वीणेव वाणीश्रवणशुभसुधास्यन्दिनी सज्जनानाम्॥२॥

ताराभाः पञ्चवर्णाः सदसि सुमनसोऽभ्रादभुर्नाकिमुक्ताः,
मूर्द्धन्युच्चैरशोकोऽभिनवदलफलैर्नृत्यतीव प्रमोदात्।
पार्श्वः पश्चानुपूर्व्या स्तुत इति भगवानष्टभिः प्रातिहार्यै-
र्भव्येभ्यः पूर्णभद्रैर्गणिभिरतिनुतः पूर्णभद्रं ददातु॥३॥

**॥इति स्तवनम्॥**

## (१.७)

### अज्ञातकर्तृकम्

## ॥अष्टप्रातिहार्यगर्भितपार्श्वजिनस्तवनम्॥(२)

**(प्रभातीरागेण गीयते)**

स्वर्णसिंहासनं स्वामिनोऽधःस्थितम्, मस्तकस्योपरिच्छत्ररत्नत्रयम्।
पृष्ठतश्चैत्यशाखी विभामण्डलम्, पार्श्वतश्चारुणी चामरे चाद्भुते॥१॥

वेणुवीणादिसंवादिका अम्बरे, दिव्यनादास्ततो दैवतो दुन्दुभिः।
पुष्पवृष्टिर्विचित्रा पुनः सर्वतः, प्रातिहार्याष्टकं प्रातु तन्मे मुदम्॥२॥

तदतिमहिमयोगादद्भुतेन्द्रध्वजाद्यै-
रतिशयरमणीयं पार्श्वदेवायं(धि?) देवम्।
हृदयकमलमध्ये ध्यायतो बोधिलाभः,
स्फुरति जिनपतिश्रीः श्रेणिकस्येव [व]स्या(श्या)॥३॥(मालिनी)

**॥इति अष्टमहाप्रातिहार्यस्तवनम्॥**

## (१.८)
## श्रीअजितसिंहसूरिकृतम्
# ॥पार्श्वजिनस्तवनम्॥
## (अनुष्टुप्)

ॐ नमो भगवते श्रीपार्श्वनाथाय ह्रीं प्रगे। धरणेन्द्रपद्मावतीसहिताय सदा श्रिये॥१॥

अट्टे मट्टे तथा क्षुद्रविघट्टे क्षुद्रमेव हि। स्तम्भय स्तम्भय क्षुद्रान् स्वाहान्तैरेभिरक्षरैः॥२॥

पद्ममष्टदलोपेतं मायाङ्कं जिनलाञ्छितम्। पत्र[1]मध्यान्तरालेषु पत्रोपरि यथाक्रमम्॥३॥

अष्टावष्टौ तथैवाष्टौ विन्यस्ताक्षरमण्डलम्। तत्राष्टशतजापेन ज्वरमेकान्तरादिकम्॥४॥

रिपुचौरमहीपालशाकिनीभूतसम्भवाम्। अरण्याद[2]हिजां भीतिं हन्ति बद्धं भुजादिषु॥५॥

पुष्पमालां जपित्वा च मन्त्रेणाष्टशताधिकम्। प्रक्षिप्ता पात्रकण्ठेषु भूतादीन् स्तम्भयेद् ध्रुवम्॥६॥

गुग्गुलस्य गुटीनां च शतमष्टोत्तरं हुतम्। दुष्टमुच्चाटयेत्सद्यः शान्तिं च कुरुते गृहे॥७॥

देवस्याजितसिंहस्य नीलवर्णस्य संस्तवात्। लभन्ते श्रेयसीं सिद्धिं कवयो वाञ्छितैः सह॥८॥

श्रीअश्वसेनकुलपङ्कजभास्करस्य पद्मावतीधरणराजनिषेवितस्य।
वामाङ्गजस्य पदसंस्तवनाल्लभन्ते, भव्याः श्रियं सुभगतामपि वाञ्छितानि॥९॥(वसन्ततिलका)

**॥इति पार्श्वस्तवनम्॥**

---

१ द्म मु.
२ दे मु.

## (१.९)
## श्रीकुशललाभरचितम्

# ॥पार्श्वजिनस्तोत्रम्॥

ॐ ह्रीं श्रीँ धरणोरगेन्द्रमहितश्रीसप्तभोगोल्लसन्माणिक्यावलिकान्तिसञ्चयदिनध्वान्तप्रतापप्रभुः।
श्रीवामोदरचारुपङ्कजवनीमार्तण्डबिम्बायते, विघ्नश्रेणिनिमन्थनो विजयते श्रीपार्श्वनाथो जिनः॥१॥

(शार्दूलविक्रीडितम्)

ॐकारैः ह्रीँकारैः श्रीँकारैर्वर्णसङ्घातैः। हृत्पुण्डरीकपीठे स्मरन्ति श्रीपार्श्वतीर्थकरम्॥२॥(आर्या)

ध्यायन्ति स्फटिकश्वेतमभिप्रेतं परं पदम्। ह्रीँकारश्रीँवशीकारचतुरं पार्श्वतीर्थपम्॥३॥

लभन्ते कमलामूर्द्धि(मृद्धिं)सिद्धिं वृद्धिं सुपुत्रताम्। प्राज्यं राज्यं कलत्रं च सम्यक्तत्त्वं सुनिश्चलम्॥४॥(अनुष्टुप्)

निःशेषमन्त्राक्षरचारुमन्त्रम्, श्रीपार्श्वतीर्थेश्वरनामधेयम्।
सदा स्मरामः प्रभुदा महामः, प्रीत्या नमामः कुशलं लभामः॥५॥(उपजातिः)

**॥इति पार्श्वनाथस्तोत्रम्॥**

## (१.१०)
### अज्ञातकर्तृकम्

## ॥पार्श्वजिनलघुस्तवनम्॥

### (छन्दः-शार्दूलविक्रीडितम्)

स्यात्तस्मै नम ओँ नमो भगवते श्रीपार्श्वनाथाय यो,
मध्ये पङ्कजमूर्द्धमूर्तिरतनुस्फारस्फटालङ्कृतः।
ॐ ह्रीँ श्रीं धरणेन्द्रसेवितचतुर्दिक्पार्श्वनागोऽष्टभिः,
पत्रस्थैः सहिताय वर्णनिवहैः पद्मावतीमुख्यकैः॥१॥

अट्टे मट्टे जिनेन्द्रक्रमकजमविकटे[1] क्षुद्रसंसिद्धिघट्टे,
क्षुद्रद्राग्देवपार्श्वक्रमकमलजुषां स्तम्भय स्तम्भयोच्चैः।
स्वाहान्तेऽथ त्रिलोकी त्रिगुणपरिवृत[2] क्रौँनिरुद्धे विधेया,
सद्यः सिद्धिर्मनीषाविषयमनुमतामर्थिनां कामधेनुः॥२॥(स्रग्धरा)

आस्थानीषु महीभुजां स विजयी नश्यन्त्यवश्यं ततो,
वेलैकान्तरकातृतीयकमहा[3] चातुर्थिकाद्या ज्वरा।
नालं मुद्गरशाकिनीप्रभृतयः स्थातुं पुरस्ताद् दृशो,
निर्भीको भुवि बम्भ्रमीति य इमां त्वत्पादरक्षां वहेत्॥३॥

॥इति लघुस्तवनम्॥

---

१ मुकटे इति आ७२।
२ गत इति आ७२।
३ कनिशाचा इति आ७२।

## (१.११)
### अज्ञातकर्तृकम्

## ॥पार्श्वजिनलघुस्तवनम्॥

**(आर्या)**

सरभसनतविद्याधरसुरवरमुनिनिकरमधुकरालीढम्।
प्रणतजनजनितकमलं, जयताज्जिनपार्श्वपदकमलम्॥१॥

अतिविपुलकोमलारुणविमलाङ्गुलिपत्रलं पदाब्जं ते।
श्रीअश्वसेननन्दन!, मम वितरतु सकलभद्राणि॥२॥

मेचकमणिदेहरुचो, पाटलनखकिरणकेसरकलापम्।
चरणसरसीरुहं ते, विदलति दुरितानि मे नाथ!॥३॥

अतिसुललितसममांसलपक्ष्मलसुविशालजङ्घिकानालम्।
तव चरणसरोजं नो, तनोतु सुकृतानि पार्श्वजिन!॥४॥

विलसत्प्रदीपकिञ्जल्ककल्पपीयूषसरससमकल्पम्।
तव पदपद्मं पुष्णातु देव! मम वाञ्छितमशेषम्॥५॥

एवं पार्श्वजिनेश्वर!, ये तव पादाम्बुजं स्तुवन्ति मुदा।
ते झटिति झटितपापा, जायन्ते सकलसुखभाजः॥६॥

**॥इति श्रीपार्श्वलघुस्तवनम्॥**

## (१.१२)
## श्रीमेरुनन्दनोपाध्यायकृतम्
# ॥श्रीजीरापल्ल्यष्टकम्॥
## (मालिनी-छन्दः)

असुरसुरनरेन्द्रश्रेणिकोटीरकोटी-
तटसुघटितमाणिक्यायमानप्रतापः।
य इह जपनमात्राज्जायते भीतिनाथः,
स जयति भुवि जीरापल्लिराट् पार्श्वनाथः॥१॥

कनकतुहिनविन्ध्यास्तोदयक्ष्माधरेषु,
प्रकटितलयलक्षाः सिद्धगन्धर्वयक्षाः।
यदतिशयविशेषं जाग्रति स्निग्धगाथः,
स जयति भुवि जीरापल्लिराट् पार्श्वनाथः॥२॥

चपलकुसमचापोत्तापसन्तापिताङ्गाः,
अमृतरसभुजोऽपि स्वर्गिणः कामयन्ति।
गुरुमहिम यदीयं सेवितुं स्नानपाथः,
स जयति भुवि जीरापल्लिराट् पार्श्वनाथः॥३॥

टलति खलु कुवेला याति दुष्टावहेला,
मिलति सुखदमेला सिद्धिलक्ष्मीमहेला।
शरण इह यदीये दधीयं सन्मम(सन्नमन्ना)न्नाकिनाथः,
स जयति भुवि जीरापल्लिराट् पार्श्वनाथः॥४॥

तरणिरिव यदीयं दर्शनं प्राणिभाजां,
विघटयति तमांसि श्रेयसां राति राशिम्।
अभिमतशतदाता मे महाबुद्धिनाथः,
स जयति भुवि जीरापल्लिराट् पार्श्वनाथः॥५॥

परमहिमनिधीनां मन्त्रयन्त्रौषधीनाम्,
समधिकमपि कार्यं यस्य नामैव चक्रे।
दुरितविततवल्लीभञ्जने हस्तिनाथः,
स जयति भुवि जीरापल्लिराट् पार्श्वनाथः॥६॥

यशसि भवति लाभः सिद्धिमुक्ताफलाभः,
प्रसरति गुणवारः सेवते श्रीप्रकारः।
यदभिनमनभाजो योगिनामेकनाथः,
स जयति भुवि जीरापल्लिराट् पार्श्वनाथः॥७॥

शरणमयमितीव प्राणिनो यन्निदध्यु-
र्मनसि निशि-दिवाऽपि स्तोमितस्तन्मयाऽपि।
सकलसुमुनिमेरोर्नन्दनश्रीसनाथ[थः],
स जयति भुवि जीरापल्लिराट्पार्श्वनाथः॥८॥

**॥इति श्रीजीरापल्ल्यष्टकम्॥**

**(१.१३)**

**उपाध्यायश्रीमेरुनन्दनकृतम्**

## ॥करहेटकपार्श्वजिनस्तोत्रम्॥

**(छन्दः-वसन्ततिलका)**

आनन्दभिन्दकुमुदाकरपूर्णचन्द्रम्,
विश्वत्रये नयनशीतलभावचन्द्रम्।
उद्दण्डचण्डमहिमप्रभुता सनाथम्,
नित्यं नमामि करहेटकपार्श्वनाथम्॥१॥

नाथ! त्वदीयमुखमण्डलमीक्ष्यमाणो, नायं जनो लवणिमापरपारमेति।
पोतः प्रयत्नचलितोऽपि कदापि किं वा, जङ्गम्यते चरमसागरपुष्करान्तम्॥२॥

कान्तं तवेश! नयनद्वितयं विलोक्य, कार(रु)ण्यपुण्यपयसा भरितं सरोवत्।
मल्लोचने हिर(हरि)णवच्चपले लभेते, सन्तोषपोषमयतां भवदाहतप्ते॥३॥

कल्पद्रुमो मम गृहाङ्गणमागतोऽद्य, चिन्तामणी करतले चटितोऽद्य सद्य(द्यः)।
अद्यासृता मम पदौ सुरथेन(धेनु)रेव, यद्भेटितोऽसि करहेटकपार्श्वदेव॥४॥

सिद्धान्य(नि) मेऽद्य सकलानि मनोमतानि, पापानि पार्श्वजिन मे विलयं गतानि।
याचे न किञ्चिदपरं भवतो गभीरं ध्यानं तवास्तु हृदये मम मेर(रु)धीरम् ॥५॥

**॥इति करहेटकपार्श्वस्तोत्रम्॥**

## (१.१४)
## उपाध्यायश्रीजयसागरगणिरचितम्

## ॥श्रीस्तम्भनकपार्श्वजिनस्तवनम्॥

योगात्मनामप्यरं परं परं भिन्दानमेनः सकलं कलङ्कलम्।
वामेयमाहुः सदयो दयोदयो मुदे स मेऽदभ्रमहा महा महा(हाः?)॥१॥[1]

अहो! तवास्था चरणे रणेऽरणे यदद्भुताकारधरा धराधरा।
सुराङ्गनास्वान्तमना मनामना(?), न यद्विकारं नवभा वभा वभा॥२॥[2]

विभो तवासेवनयानयानया, निवारितावाच्यमयामयामया।
अतः प्रसादाद्भवतोऽवतो वतो(?), तीर्णोऽस्मि दुःखात् परमार! मारमा(?)॥३॥[3]

यन्मौलिदेशे त्वमदामदामदा, वाञ्छार्थसम्पत्तिकरं करङ्करम्।
न तन्मनोऽरंस्त हरौ हरौ हरौ, मायामयेनापि भवे भवे भवे॥४॥[4]

दिष्ट्या स्तम्भनकेशपार्श्वभगवन्! नानागुणग्रामणी-
रेषा श्रीजयसागरेण रचिता स्वल्पाक्षरापि स्तुतिः।
तर्कव्याकरणादिशास्त्रविदुषां यायादुपादेयतां
सौवर्णाभरणं सुरत्नखचितं यद्वा न कस्य प्रियम्॥५॥ (शार्दूलविक्रीडितम्)

**॥इति श्रीपार्श्वस्तवनम्॥**

---

१ योगात्मनामपि - योगिजनानामपि सकलं - सर्वं कलङ्कलं - कलङ्कदम् एनः - पायं भिन्दानं - भेदकं वामेयं - श्रीपार्श्वनाथ महाः - महापुरुषाः पूजनीया जनाः अपरम् - अशत्रुं परम् - उत्तमम् परं - श्रेष्ठम् आहुः - कथयन्ति। सः - पार्श्वनाथः कीदृशः? सदयः - दयासहितः दयोदयः - दयाया उदयो यस्मात् सः अदभ्रमहाः - पुष्कलतेजाः मे - मम मुदे - प्रमोदाय अस्तु। अन्तिमपद - महा?।
कलङ्कलम् - लम् नो लुनाति-छिनत्ति अर्थ करीએ तो 'वामेयं' नुं विशेषण पण थई शके. मह - अकारान्त पुल्लिङ्ग - मह् धातु - अ प्रत्यय (આધાર નથી)

२ अहो! हे पार्श्वप्रभो तव चरणे (आचरणे) मम आस्था - श्रद्धा कीदृशी सा? रणेऽरणे - युद्धे-अयुद्धे (सुख-दुःखसमये) यदद्भुताकारधरा कीदृशः स आकारः? धराधरा - धरां धरति या – तद्वदतीव निश्चला पुनः कीदृशी? सुराङ्गनास्वान्तमनाः - देव्याः हृदयं चित्तं च यस्यां सा विकारमनयत् - विकारं दूरीकृतवती। नवभावभा - स्तुते रागस्तस्य भावस्य आभा यस्यां सा॥२॥
नयद्विकारं - અવગ્રહ ન હોય તો न-यद्विकारं। नय-द्विकारं....?॥२॥

३ विभो - हे पार्श्वप्रभो! तव अनया आसेवनया - परिचर्चया मया वाच्यमयाऽऽमयाः - दूषणमया रोगा येषु ते, अनयाः - दुर्नयाः निवारिताः - दूरीकृताः। अतः अवतः - रक्षतः (व.कृ.६/१) भवतः प्रसादाद् दुःखात् तीर्णोऽस्मि। (कीदृश हे विभो!) परमार! श्रेष्ठाः आराः नीतयः यस्य सः, तत्सम्बुद्धौ।

४ यन्मौलिदेशे - यत्सर्वोत्तमप्रदेशे त्वम् वाञ्छार्थसम्पत्तिकरम् - इच्छापदार्थवैभवकारकम् करङ्करम् - पात्रविशेषदम् अदाः - अयच्छः। अदामदाम् मायामयेनापि - मायाविनापि तेन तन्मनः - तस्य चित्तं हरौ - ब्रह्मणि हरौ - इन्द्रे हरौ सूर्ये अथवा चन्द्रे भवे महादेवे भवे संसारे भवे जन्मनि न अरंस्त - नारज्यत।
मायामयेनापि - मायामयेनेपि होय तो ब्रह्मा - महादेवादि...पण जन्म..?
अदामदाम् - दामन् - दानादादान। દાતા ન હોવા છતા પણ દાન આપનારા....(અન્વય - મુનિશ્રી રાજસુંદરવિજયજી મ.સા.)

(१.१५)

अज्ञातकर्तृकम्

## ॥चतुर्विंशतिजिनस्तवनम्॥

(आर्या)

ऋषभजिनमजितनाथं, सम्भवमभिनन्दनं जिनं सुमतिम्।
पद्मप्रभं सुपार्श्वं, चन्द्रप्रभमशुभतिमिरघन(घ्न?)म्॥१॥

सुविधिं शीतलनाथं, श्रेयांसं वासुपूज्यतीर्थकरम्।
विमलजिनमनन्तजिनं, धर्मं धर्मोत्तमं शान्तिम्॥२॥

कुन्थुं जिनवरमीशं, मल्लिं मुनिसुव्रतं नमिजिनेन्द्रम्।
जिनवरमरिष्टनेमिं, पार्श्वजिनं वर्द्धमानं च॥३॥

इति नामानि जिनानां, सुरदैत्यकपर्द(र्दि)यक्षविनुतानाम्।
संस्मरति यस्त्रिकालं, शिवपदमचिरादसौ लभते॥४॥

॥चतुर्विंशतिजिनस्तवनम्॥

## (१.१६)
## आ.श्रीऋषिवर्द्धनसूरिरचित
## ॥श्रीनगरकोटमण्डनचतुर्विंशतिजिनस्तवन॥
### (श्रीशंत्रुजय तीरथ सार)

नाभिराजकुलकमलमरालं, प्रथम(तीर्थ)करमुदयविशालं, जिनपतिमजितमबालम्।
वन्दे विनयविनतभूपालं, सम्भवमभिनन्दनमनरालं, दूरितभवजम्बालम्॥१॥

सुमतिमुदितमहिमामित[मालं,] श्रीपद्मप्रभजिनमकरालं, त्रिभुवनजनसुरसालम्।
श्रीसुपार्श्वमभिनौमि सुभालं, चन्द्रप्रभविभुमतिसुकुमालं, शमरसकी[र]रसालम्॥२॥

कमलाकेलिकमलपदकमलं, पुष्पदन्तशीतलजिनयमलं, नमत नमत मतममलम्।
श्रीश्रेयांसमसंशयशबलं, वासुपूज्यजिनपतिमतिसबलं, विगलितकलिकलितुमुलम्॥३॥

अविकलकेवलकमलाविमलं, जनताजनितोदयमथविमलं, जिनमनन्तजितमतुलम्।
धर्मनाथमवितथपथकुशलं, वसुधातलविस्तारितकुशलं, भजत शान्तिमतिसकलम्॥४॥

कुन्थुनाथमतिविशदाचारं, वचनकलाविजितामृतधारं,श्रीअरजगदाधारम्।
इन्द्रनीलसमदेहमुदारं सेवे मल्लिनाथमविकारं, मुनिसुव्रतनेतारम्॥५॥

नमिजिनमुज्ज्वलगुणगम्भीरं, नेमिनाथमधिगतभवतीरं, नीरञ्जनकोटीरम्।
वन्दे पार्श्वदेवमतिधीरं, विघ्नहरं कनकाभशरीरं, श्रीमन्तं जिनवीरम्॥६॥

नगरकोटवरनगरे दशरथकारितजिनभवने शिवशिवपथ[रुचि]रचैत्येष्वपि सारम्।
जिनवरनिकरमेवमहमविरतमानमामि सादरमुदितोदितचिन्तितफलदातारम्॥७॥

**॥इति श्रीनगरकोटमण्डनचतुर्विंशतिजिनस्तवनं श्री श्रीऋषिवर्द्धनसूरिभिः कृत॥**

**(१.१७)**

**आचार्यश्रीऋषिवर्धनसूरिकृता**

## ॥चतुर्विंशतिजिनस्तुतिः॥

**(चैत्यवन्दनचतुर्विंशतिका)**

**(अनुष्टुप्)**

**॥श्रीगुरुभ्यो नमः॥**

### ॥श्रीऋषभजिनस्तुतिः॥

परमात्मस्वरूपाय परमानन्ददायिने। नमः श्रीऋषभेशाय वीतक्लेशाय तायिने॥१॥

गुणान् व्यावर्ण्यतोऽनन्तान् केवल्यपि न पारयेत्। जन्मजिह्वाफलायैव तद्विवक्षाश्रमस्तु मे॥२॥

जन्मानन्तभवभ्रान्तौ तत्कुतः सुलभं विभो!। त्वद्गुणग्राहिणी यत्र जिह्वा जागर्ति भक्तितः॥३॥

जन्तुर्न जायते यावत् त्वद्गुणग्रहणाग्रही। निःसरत्यसकौ तावत् कथं संसारकूपतः?॥४॥

प्रभुत्वज्ञानवैराग्योपदेशप्रशमादयः। गुणास्तव विभो! विश्वोपकाराय न केऽभवन्?॥५॥

दीप्यन्ति त्वद्गुणा यस्य चित्तसौधे प्रदीपवत्। दूरे मोहतमःस्तोमव्यामोहस्तस्य नश्यति॥६॥

शक्रचक्र्यादिसाम्राज्यं प्रतिष्ठा त्वर्हदादिका। स्वामिँस्तव गुणस्तोतुर्भुक्तिर्मुक्तिश्च निश्चितम्॥७॥

तात! तत्ते गुणान् स्तौमि स्मरामि स्पृहयामि च। नित्यशो ग्रहणात्तेऽपि त्वत्प्रसत्त्या भजन्तु माम्॥८॥

एवं सर्वगुणग्रामविश्रामः कामनाधिकाम्। ददातु सातसम्पत्तिं स्तुतः श्रीनाभिनन्दनः॥९॥

**॥इति चतुर्विंशतिजिनस्तुतौ श्रीऋषभदेवस्य गुणस्तुतिनामा प्रथमोऽध्यायः॥**

### ॥श्रीअजितजिनस्तुतिः॥

जयाजितजिनाधीश! योगीन्द्रयतिजीवन!। जगज्जङ्गमकल्पद्रो! ज्योतिर्मय! निरञ्जन!॥१॥

रागादिविजिताज्ञानसुरैः साम्यं वदँस्तव। सर्वज्ञ! क्षीणदोषस्य हास्यः स्यात्कस्य नो जडः ? ॥२॥

राजरङ्कार्कखद्योतक्षीरक्षारमितद्रुवत्। अर्हँस्तव हरादीनामन्तरं हि महत्तरम्॥३॥

किलाखिला अमी दोषास्त्वया निर्यासिताः प्रभो!। शिश्रियुः परतीर्थेशान् रिपवोऽन्यनृपानिव॥४॥

तेऽपि तत्प्रेरणामूढा बिभ्राणास्त्वयि मत्सरम्। बम्भ्रम्यन्ते भवाटव्यां द्वेषो दुःखाय यत् प्रभौ॥५॥

निग्रहानुग्रहाद्या ये परैर्गुणतयोदिताः। दोषत्वात्ते त्वया त्यक्ताः सूक्ष्मदृक् ते तदद्भुता॥६॥

रागाद्युपज्ञं विज्ञाय भवभ्रमपराभवम्। तत्त्यागाय तवोपास्तिं सन्तो धन्या वितन्वते॥७॥

जयन्तु तव वाक्यानि तानि यैः श्रुतिमागतैः। दोषाः खलु विलीयन्ते हिमानीवार्करश्मिभिः॥८॥

अमन्दानन्दपोषाय निर्दोषाय सुखात्मने। भवतेऽतिशयामेय! वैजयेय! नमो नमः॥९॥

**॥इति चतुर्विंशतिजिनस्तुतौ श्रीअजितनाथस्य दोषक्षयस्तुतिनामा द्वितीयोऽध्यायः॥**

## ॥श्रीसम्भवजिनस्तुतिः॥

श्रीसम्भवविभो! भूरिभवभ्रमणसम्भवम्। पराभवभयं भेत्तुं भजे भक्त्या भवत्पदौ॥१॥

कलयन्ति न के नाकिनायकाः कलहंसताम्। क्रमकोकनदद्वन्द्वे तव देव! दिवानिशम्॥२॥

चरणौ सुकुमालौ ते वहामीति मुदा हृदा। सुकुमालं सचरणं प्रतिजन्मेदमस्तु मे॥३॥

वज्रोत्कीर्णाविव पदौ तव यच्चेतसि स्थितौ। ज्ञानं च ब्रह्मसानन्दं न दूरे तस्य निश्चितम्॥४॥

दशाशायातभक्ताशापूर्त्यास्योद्योतहेतवे। स्वर्मणीदर्पणायन्ते दशापि त्वत्पदोर्नखाः॥५॥

तीर्थं पुण्यमयं नाथ! सा धरा स धरोऽप्यभूत्।<br>
यत्रासीत्त्वत्पदन्यासः प्रभावोऽतः परोऽपि कः?॥६॥

रजोऽपि त्वत्पदोर्लग्नं ललाटे नम्रभाविनाम्। द्रव्यभावरुजः सर्वाः शमयेदद्भुताद्भुतम्॥७॥

मुखस्पर्धा मुधामीभिः कृता तत्क्षम्यतां विभो!। इतीव ते पदन्यासे सुराः पद्मान्यधो न्यधुः॥८॥

न तादृक् व्रतदानादिशक्तिर्मेऽत्र प्रभो! परम्। त्वदङ्घ्रिध्यानमेवैकं शरणं मेऽस्तु शर्मणे॥९॥

**॥इति श्रीचतुर्विंशतिजिनस्तुतौ श्रीसम्भवनाथस्य चरणस्तुतिर्नामा तृतीयोऽध्यायः॥**

## ॥श्रीअभिनन्दनजिनस्तुतिः॥

शिवपूःस्यन्दनं पापतापव्यापैकचन्दनम्। अभिनन्दनमानौमि जगदानन्दनं जिनम्॥१॥

ससौरभं सुवर्णाभं तव वीक्ष्य वपुर्न के। सुवर्णं न सुगन्धि स्यादित्यसत्यं प्रपेदिरे॥२॥

स्मरोऽनङ्गस्त्वया चक्रे शक्राद्यास्त्रिदशाश्च ते। त्वत्पुरः किङ्करास्तत् ते रूपं केनोपमीयते?॥३॥

रूपं तेऽनुपमं पश्यंस्त्रिदिवादेत्य नित्यशः। शक्रः सहस्रनेत्रत्वं स्वस्य धन्यममन्यत॥४॥

त्वदङ्गश्रीजितत्वेन ह्रीणं स्वर्णं तदाद्यपि। प्रविश्य ज्वलने जाने तदाप्त्यै तनुते तपः॥५॥

रूपं पुण्योदयात् पुण्यं तवोत्कृष्टं त्रिविष्टपे। सर्वातिशायि तद्रूपं युक्तमेव जिनेन्द्र! ते॥६॥

स्वस्यान्यस्य च पापाङ्गं रूपं प्रायोऽन्यदेहिनाम्। उभयोः सुकृताङ्गं तु त्वद्रूपं परमार्थतः॥७॥

रूपं समवसरणजुषश्छत्रादिशोभितम्। तव यैर्ददृशे देव! तैर्दृशां फलमानशे॥८॥

ममाप्यकुण्ठा त्वद्रूपेक्षणोत्कण्ठा विजृम्भते। प्रसादं कुरु कारुण्याकर! तां पूरयैकदा॥९॥

**॥इति श्रीचतुर्विंशतिजिनस्तुतौ श्रीअभिनन्दनस्वामिनो रूपस्तुतिर्नामा चतुर्थोऽध्यायः॥**

## ॥अथ सुमतिजिनस्तुतिः

सम्मतेऽसुमतां मन्तुमतोऽपि मम ते मते। सुमते! रमते वीतममते मतिरुन्नते॥१॥

जीवाजीवादितत्त्वानां सम्यग्ज्ञानं च पालनम्। विना ह्यपारसंसारनिस्तारस्य कथा वृथा॥२॥

तच्च प्रजायते जन्तोः शासनोपासनात् तव। लभ्यते भूरिभाग्येन शासनं तव च क्वचित्॥३॥

नयन्त्यसारसंसारव्यापारैर्जन्म निःफलम्। मोहान्धा दुर्धियो धिग्धिक् तवासाद्यापि शासनम्॥४॥

स्वर्मणीतरुगोस्वर्णनरसिद्धरसादितः। अप्याधिक्यादसुलभं तवाद्भुतमिदं मतम्॥५॥

ऋद्धयः सिद्धयः सर्वाः सुखमाशिवमीप्सितं। त्वन्मतासेवनादेव सम्पद्यतेऽप्यसंशयम्[१]॥६॥

ओषधी रसमन्त्राद्या लब्धा अपि फलप्रदाः। सेवयैव[२] यथा नाथासुमतां ते मतं तथा॥७॥

त्वन्मतासक्तचित्तस्यापदोऽप्यायतिसम्पदः। परस्य भगवन्! भूरिसम्पदोऽपि महापदः॥८॥

अल्पायासं बहुफलं महत्त्वैकनिबन्धनम्। रत्नवाणिज्यवत् कश्चित् धन्यस्ते मतमश्नुते॥९॥

**॥इति श्रीचतुर्विंशतिजिनस्तुतौ. श्रीसुमतिनाथस्य शासनस्तुतिर्नामा पञ्चमोल्लासः॥**

## ॥अथ पद्मप्रभजिनस्तुतिः

पद्मरागप्रभः पद्मपूज्यः पद्मदलेक्षणः। पायात्पद्मप्रभः पद्मासद्मपद्माङ्कितक्रमः॥१॥

पञ्चत्रिंशदतिशयां श्रवणामृतसारिणीम्। द्विधा सकर्णः कोऽवर्ण्यां वाणीं शुश्रूषते न ते?॥२॥

पृथक् सर्वाङ्गिभाषासु पर्यणंसीत्तवैकवाक्। बहुवर्णाम्बुकुण्डेषु सङ्क्रान्त इव शीतरुक्॥३॥

अनेकदेहिसन्देहसन्दोहानेकया गिरा। निराचकृथ कारुण्यात् कस्यान्यस्येदृशीशता?॥४॥

सुरासुरनराः पक्षिपशुमीनोरगा अपि। दधुर्धर्मधियं के न त्वद्वाक्चातुर्यरञ्जिताः?॥५॥

तव वाचं निपीयापि गतमिथ्याभ्रमा न ये। सुधापानेऽपि नीरोगा भाग्यहीना न तेऽभवन्॥६॥

मधुरं ह्यमृतान्नान्यत् त्वद्गीरग्रे तदप्यसत्। पिपासामास सोल्लासं यत्सुधाभुग्गणोऽपि ताम्॥७॥

महानन्दनिलीनो न[३] श्रोता शीतातपादिकम्। विवेद सिद्धवद्धर्मोपदेशं त्वयि तन्वति॥८॥

धन्यास्ते यैः श्रुता गीस्ते स्थिता यद्धृदि तेऽधिकाः। धन्यातिधन्यास्ते कुर्युस्तदादिष्टविधिं तु ये॥९॥

**॥इति श्रीचतुर्विंशतिजिनस्तुतौ श्रीपद्मप्रभस्वामिनः पञ्चत्रिंशदतिशयस्तुतिर्नामा षष्ठोल्लासः॥**

---

१ ऽपसंशयः इति मु.

२ सावद्यै इति मु.

३ दति इति मु.

## ॥अथ सुपार्श्वजिनस्तुतिः॥

तपोऽकूपारपारीणं तमपारकृपारसम्। श्रीसुपार्श्वमपालस्यं श्रीसुपार्श्वमुपास्महे॥१॥
चक्रे प्रोचे च किं षोढा बाह्यमभ्यन्तरं तपः। सुदुर्जयान्तरङ्गारिषड्वर्गविजिगीषया॥२॥
तवाश्चर्यमयैश्वर्यं जिन! युक्तं विजृम्भते। भवतेव तपःकर्म कर्तुं यत्केन शक्यते ?॥३॥
प्रेक्ष्य प्रथमसंस्थानं दिव्यद्युतिमयं वपुः। कः श्रद्दधाति मिथ्यादृक् तव तीव्रतरं तपः?॥४॥
तपसः खलु सन्तोषः सन्तोषाच्च मनःसुखम्। ततोऽङ्गसौष्ठवं स्पष्टं स जडो नेति वेत्ति यत्॥५॥
गोघृतेक्षुसितोत्पत्तिर्यथा युक्तिविदः सुखम्। तपोमर्मविदो मुक्तिर्विभो तेऽभूत्तथा सुखम्॥६॥
भृगुपातासिघाताग्निदाहादिक्लेशमप्यृते। तवैकाहतपस्यापि रात्यहो सुखमाशिवम्॥७॥
पायसाद्यशिनां ब्रह्म सेवालादिभुजां भवः। सज्ज्ञानाज्ञानतपसां द्विधापीशान्तरं महत्॥८॥
अन्तःसुखं बहिस्तीव्रं यत्तपस्त्वदुदीरितम्। कथं प्रत्येति बध्नाति तत्रार्वाचीनदृग् रतिम्॥९॥
आत्मैति हेममृदिवानादिकर्ममलाविलः। त्वत्प्रणीततपोवह्नियोगे सिद्धसुवर्णताम्॥१०॥
तपःक्षपितपापाय दुःप्रापायाकृतात्मनाम्। नमस्तुभ्यमलक्ष्यात्मस्वरूपपरमात्मने[1]॥११॥

**॥इति श्रीचतुर्विंशतिजिनस्तुतौ. श्रीसुपार्श्वनाथस्य तपःस्तुतिनामा सप्तमोल्लासः॥**

## ॥अथ चन्द्रप्रभजिनस्तुतिः॥

चन्द्रचारुयशाश्चन्द्रवदनश्चन्द्रलक्षणः। चन्द्रप्रभ! चिरं जीयाश्चन्द्रचङ्गाङ्गसौरभः॥१॥
त्वद्देहेऽनुपमं रूपमामोदश्चन्दनाद्भुतः। यच्च नामयनामापि न स्वेदमलयोर्लवः॥२॥
ऊज्जृम्भाम्भोजसौरभ्यो यश्च ते वदनानिलः। स्निग्धगोदुग्धशुभ्रं चाविस्रं यद्रुधिरामिषम्॥३॥
यच्चाहारोऽपि नीहारो नृतिरश्चामगोचरः। तदेतेऽतिशया नेतश्चत्वारस्ते सहोत्थिताः॥४॥
पूतिस्त्रीकुक्षिजत्वेऽपि तुल्ये तेऽन्यदृशां विभो!। प्रागुग्रपुण्यभेदेन युक्तैवाजनि भिन्नता॥५॥
पद्मसेवालयोर्भेदस्तोयादुत्पन्नयोर्न किम्?। हिरण्यलोहयोश्चाद्रेः सिन्धोर्मौक्तिकमीनयोः॥६॥
वर्णसत्त्वगतिस्नेहस्वरलक्षणकान्तयः। भाग्यसौभाग्यदाक्षिण्यलावण्यमतिशक्तयः॥७॥
माधुर्यौदार्यगाम्भीर्यप्रतापोपक्रमादयः। अन्येऽपि सहजाः स्वामिन्! गुणास्ते भुवनाद्भुताः॥८
सहजानन्दरूपाय सहजानन्तशक्तये। नमः सहजशान्ताय भगवँस्तुभ्यमर्हते॥९॥

**॥इति चतुर्विंशतिजिनस्तुतौ श्रीचन्द्रप्रभस्वामिनः सहजातिशयस्तुतिर्नामाष्टमोल्लासः॥**

---

१ १०,११ श्लोकद्वयं नास्ति मु.

## ॥अथ सुविधिजिनस्तुतिः॥

प्रबोधसेवधे! धन्यावधे! धैर्यमहोदधे!। विधेहि धर्मसान्निध्यं मयि श्रीसुविधे! विभो!॥१॥
चतुर्दशमहास्वप्नानस्वप्नाधिपसेविते[१]। त्वयि गर्भगते माता जातानन्दा निरैक्षत॥२॥
प्राज्यं द्विधापि साम्राज्यं भविताऽस्येति हस्तिराट्। असौ विशुद्धधर्मस्य भारं वोढेतिमत्र(त्त)गौः॥३॥
मोहहस्तिमहायूथं हन्तासाविति केसरी। रन्तादःपदनम्राणां मन्दिरे श्रीरितीन्दिरा॥४॥
यशःपरिमलो विश्वव्यापकोऽस्येति दाम च। सुधावाग् नयनानन्दो भाव्यसाविति शीतरुक्॥५॥
द्योतयिष्यति वस्तूनि ज्ञानमस्येति भानुमान्। अयमुच्चैरलङ्कर्ता कुलचैत्यमिति ध्वजः॥६॥
मङ्गलानामयं मूलम् इति हैममहाघटः। विश्रामः शिवपन्थानामसाविति महासरः॥७॥
संसारसागरस्यासौ पारं यातेति तोयधिः। कर्तारोऽस्य सुराः सर्वे सेवामिति विमानकः॥८॥
गुणरत्नान्ययं दास्यतीति रत्नसमुच्चयः। आश्वसौ भस्मसात्कर्ता कर्मैधांसीति पावकः॥९॥
भावार्थान् ज्ञापयामासुरमी नाथ! यथोचितान्। तवाचिन्त्यप्रभावस्यावतारे मुग्धचेतसाम्॥१०॥
एवं चतुर्दशस्वप्नफलैस्त्वं संस्तुतः प्रभो!। चतुर्दशगुणस्थानारोहं मे[२] देहि तत्फलम्॥११॥

**॥इति चतुर्विंशतिजिनस्तुतौ श्रीपुष्पदन्तस्य स्वप्नस्तुतिनामा नवमोल्लासः॥**

## ॥श्रीशीतलजिनस्तुतिः॥

वाक्सुधाशीतलं पादन्यासपूतमहीतलम्। नमदाखण्डलं शीलामलं श्रीशीतलं स्तुवे॥१॥
उत्थायासनतः सम्यग् विधिना वासवादिभिः। ववन्दिषे गर्भगोऽपि माहात्म्यं किमतः परम्?॥२॥
दोहदादिपूरणेन तव मातेति नार्यपि। माननीया महेन्द्राणामप्यहो मानिनामभूत्॥३॥
उद्योतो भुवने जज्ञे वायवश्च ववुः सुखाः। प्रसेदुः कुकुभः सर्वाः प्रायुः शं नारका अपि॥४॥
उच्चस्थानं ग्रहा जग्मुर्देशो निष्पन्नभूरभूत्। जनाः प्रमुदिताश्चासन् जिन! जन्मक्षणे तव॥५॥
शृङ्गारभासुराङ्ग्यः षट्पञ्चाशद्दिक्कुमारिकाः। ईयुर्निजनिजस्थानात्तव जन्मनि तत्क्षणम्॥६॥
अभ्यङ्गस्नानभूषादि सूतिकर्म यथोचितम्। मुदिता हृदितास्तेनुर्मातुस्तव च कौतुकम्॥७॥
प्रमोदमेदुरा मेरौ सङ्गत्य सपरिच्छदाः। देवेन्द्रा विदधुः सर्वे जन्मस्नात्रोत्सवं तव॥८॥
गन्धपुष्पफलस्वर्णरत्नमुक्ताधनादिकम्। तवावतारे गर्जन्तो घनवद् ववृषुः सुराः॥९॥
दिवि दुन्दुभयो नेदुर्जगुर्गीतं सुराङ्गनाः। तेने महं पिता यत्ते कस्य तद्विस्मयाय नु॥१०॥
महोत्सवमहानन्दमहातिशयशालिने!। श्रीशीतल! नमस्तुभ्यं लभ्याय सुकृतात्मभिः॥११॥

**॥इति चतुर्विंशतिजिनस्तुतौ श्रीशीतलनाथस्य जन्मोत्सवस्तुतिनामा दशमोल्लासः॥**

---

१ चतुर्दशमहास्वप्नान् स्वप्नाधिपति सेवते इति मु.

२ रोहणं देहि इति मु.

## ॥श्रीश्रेयांसजिनस्तुतिः॥

श्रेयःश्रीश्रेणये शान्ताशयं शमशमाश्रयम्। शेश्रीये(शिश्रिये) शरणं शश्वत् श्रीश्रेयांसमसंशयम्॥१॥

तवास्यमुद्यदानन्दं शारदेन्दुसमप्रभम्। भालं शोभाविशालं चाष्टमीविधुविजित्वरम्॥२॥

अरालकोमलोन्मीलत्स्वर्लताविभ्रगे भ्रुवौ। पद्मपत्रोपमे नेत्रे लावण्यलहरीभृते॥३॥

तिलप्रसूनसङ्काशा नासा चौन्नत्यशालिनी। बालप्रवालसोमालारुणावोष्ठौ ससौष्ठवौ॥४॥

मुक्ताफलामलस्निग्धा दन्तपङ्क्तिश्च भास्वती। रक्तोत्पलदलाभासा जिह्वा पीयूषवर्षिणी॥५॥

कर्णौ श्रीकेलिदोलाम्भौ कपोलौ दर्पणद्युती। भुजौ करिकराकारौ जगदुद्धरणक्षमौ॥६॥

वक्षश्च गोपुरस्फारं ज्ञानश्रीकेलिमन्दिरम्। पल्लवाभाङ्गुलीकम्रौ करौ कमलकोमलौ॥७॥

स्वरसत्त्वमनोवच्च नाभी(भिर्) गाम्भीर्यभाजिनी। रम्भास्तम्भानघे जङ्घे पद्मापद्मोपमौ क्रमौ॥८॥

पाणिपादनखाः प्रेङ्खच्चिन्तारत्नसखाः खलु। जिनान्यदपि ते सर्वमङ्गं त्रिजगदद्भुतम्॥९॥

तवाष्टाधिसहस्राङ्गलक्षणेक्षणतोऽक्षिणी। कस्य स्यातां न हर्षाश्रुवर्षणोत्कर्षसाक्षिणी?॥१०॥

दिव्यरूपस्वरूपाय रूपातीतपदार्पिणे। पुण्यनैपुण्यपुण्याय भगवन्! भवते नमः॥११॥

**॥इति चतुर्विंशतिजिनस्तुतौ श्रीश्रेयांसनाथस्य रूपोपमास्तुतिर्नामा एकादशोल्लासः॥**

## ॥श्रीवासुपूज्यजिनस्तुतिः॥

वासये हृदयावासे वासनावासिताशयः। वासवावश्यपूज्यं श्रीवासुपूज्यं निरञ्जनम्॥१॥

अपिबन् जननीस्तन्यमप्यन्यजनतोत्तराम्। अपुषो वपुषः पुष्टिं यन्निजाङ्गुष्ठगामृतैः॥२॥

अस्पृशः शैशवे केलीर्बालीभूतागतामरैः। पित्रोः प्रमोदपोषाय ज्ञानत्रयधरोऽपि यत्॥३॥

अज्ञासीः पण्डिताभ्यासेऽनधीयानोऽपि यत्कलाः। लिखितादिकलाः सम्यग्जातिस्मरणपाटवात्॥४॥

अलङ्घ्यं भोग्यकर्मेति जानन् ज्ञानदृशा वशी। भुक्तवान् यदरागोऽपि विषयान् पञ्चलक्षणान्॥५॥

अनिच्छन्नपि तद्भोगफलं हेमादिकोटिशः। यददा वार्षिकं दानं स्थितिरेषार्हतामिति॥६॥

ब्रह्म मे ननु भावीति विजानन्नपि यत्तपः। चकृषे व्रतमादाय सिद्धिः स्यादुद्यमादिति॥७।

अनीहोऽपि सुरोपज्ञप्रातिहार्यश्रियं भवान्। भेजे यच्चान्यजन्तूनां लाभोऽस्या दर्शनादिति॥८॥

तदिदं तव कश्चित्रं चरित्रं वेत्ति तुच्छधीः। योगिगम्यस्वरूपाय नमस्तत्ते महात्मने॥९॥

**॥इति चतुर्विंशतिजिनस्तुतौ श्रीवासुपूज्यजिनस्याऽद्भुतचरित्रस्तुतिर्नामा द्वादशोल्लासः॥**

## ॥श्री विमलजिनस्तुतिः॥

कल्याणकमलाकेलिकमलं क्रमयामलम्। सेवे श्रीवैमलं कर्तुं कोमलं विमलं मनः॥१॥

कांस्यपात्रमिवात्यन्तं त्यक्तस्नेहजलोच्चयः। राज्यरामादिरङ्गेण न च भेद्योऽसि शङ्खवत्॥२॥

अपरैरप्रतीघातयातायातोऽसि जीववत्। नभोवन्निजसामर्थ्यादन्यालम्बनवर्जितः॥३॥

वायुवच्चासि निःसङ्गः शुद्धहृत् शारदाम्बुवत्। भोगोपभोगनीरानुपलिप्तः पद्मपत्रवत्॥४॥

गुप्ताक्षः कूर्मवन्निश्राविप्रमुक्तो विहङ्गवत्। एकजातोऽसि रागादिविरहात् खड्ग(ड्गि)शृङ्गवत्॥५॥

भारण्डवच्चाप्रमत्तो गजवत् कर्मशत्रुजित्। वृषवद्धर्मधौरेयो निःप्रकम्पः सुमेरुवत्॥६॥

परीषहादिसारङ्गैर्दुर्धर्षोऽसि मृगेन्द्रवत्। समुद्र इव गम्भीरो नेत्रानन्दश्च चन्द्रवत्॥७॥

सूरवद्विश्वविद्योती जातरूपः सुवर्णवत्। सर्वंसहोऽसि भूमीवत्तेजस्वी चासि वह्निवत्॥८॥

इत्यागमोक्तोपमानैः स्तुतः श्रीविमलो जिनः। आगमाराधनफलं दत्तां मे शिवसम्पदम्॥९॥

**॥इति श्रीचतुर्विंशतिजिनस्तुतौ श्रीविमलनाथस्योपमानस्तुतिनामा त्रयोदशोल्लासः॥**

## ॥श्रीअनन्तजिनस्तुतिः॥

श्रीअनन्तजिनानन्तानादाविह भवे भ्रमन्। विना त्वद्दर्शनं जन्तुर्लभतेऽनन्तयातनाः॥१॥

अनन्तानन्तपुद्गलपरावर्तानियं पुरा। द्विधा निगोदकारासु क्लिष्टकर्मवशो वसन्॥२॥

अनन्तजन्तुभिर्जन्माहारादि बहुशः समम्। कुर्वन्नापासुखं[1] तीव्रं त्वत्प्रसत्तिं विना विभो!॥३॥

तादृक्कर्मपरीणामात् कथञ्चिन्निर्गतस्ततः। यातायातमयं चक्रे पृथिव्यादिष्वनन्तशः॥४॥

ततोऽपि निर्गतः प्राप्य त्रसत्वं कर्मलाघवात्। पुनस्तत्र ततानायमेहिरेयाहिरां मुहुः॥५॥

भूरिशो नरदेवादिभवेष्वेष ततश्चरन्। मतं ते क्वापि न प्राप रोरवत्सुरपादपम्॥६॥

क्वचिदाप्यापि तच्चक्रे मोहलोभस्मरादिभिः। वृथा क्लीबेन जीवेन हा! तत्त्वार्थमजानता॥७॥

धन्यः कोऽपि पुनश्चिन्तारत्नवत् प्राप्य तत्प्रभो!। विधिनाराध्य परमां कल्याणश्रियमश्नुते॥८॥

अधुना भूरिभाग्येन देवावापि मयापि तत्। प्रसीदाथ तथा नाथ! तन्मेऽस्तु सफलं यथा॥९॥

**॥इति श्रीचतुर्विंशतिजिनस्तुतौ अनन्तनाथस्य भवजीवस्थितिस्तुतिनामा चतुर्दशोल्लासः॥**

---

१ न्नायसुखं मु. न्नाप सुखम् इति भाव्यम्।

## ॥श्रीधर्मजिनस्तुतिः॥

श्रीधर्मनाथ! दानादिचतुर्भेदं चतुर्मुखः। चतुर्गतिच्छिदे धर्मं चतुराणामुपादिशः॥१॥

भेदाः सर्वेऽपि धर्मस्य प्रायो दानानुयायिनः। यतिधर्मोऽपि दातारं विना यन्न प्रवर्तते॥२॥

दानं दातुश्च लातुश्च श्रेयांसऋषभादिवत्। फलदायि तु शीलाद्याः कर्तुरेव गुणावहाः॥३॥

तच्च लोकेऽप्यतिश्लाघ्यमित्यादौ जगदे त्वया। दानं पात्रादिभेदेन बहुधा बहुऋद्धिकृत्॥४॥

समस्ततपसां मूलं शीलं मन्त्रादिसिद्धिदम्। दानिनोऽपि प्रतिष्ठादिकारणं भूषणं परम्॥५॥

मरुतामपि मान्यः स्याद् ब्रह्मचारीति दानतः। अन्वस्थापि त्वया शीलमुन्मीलन्महिमोज्ज्वलम्॥६॥

निकाचितापि कर्माली तपसा क्षीयते क्षणात्। प्रयान्ति तपसा शान्तिमिन्द्रियाणि मनोऽपि च॥७॥

तत्तपःशालिनां शीलमपि लीलायितं श्रयेत्। इति शीलादनु तपस्त्वयाख्यायि समृद्धिदम्॥८॥

प्रमाणं न हि दानादित्रयं भावनया विना। दानाद्यालम्बिनी सापि भावना भूरिलाभभूः॥९॥

साभिप्रायं क्रमेणेति त्वया धर्ममुदीरितम्। श्रद्धत्ते च विधत्ते यः सोऽभीष्टफलमश्नुते॥१०॥

शिवशर्मैकनिर्माणधर्ममर्माभिधायिने। भवाम्भोनिधिपोताय भगवन्भवते नमः॥११॥

**॥इति श्रीचतुर्विंशतिजिनस्तुतौ श्रीधर्मनाथस्य धर्मस्तुतिनामा पञ्चदशोल्लासः॥**

## ॥श्रीशान्तिजिनस्तुतिः॥

श्रीशान्ते! कृतभीशान्ते! स्वान्ते शान्ते रसे रसम्। किमेकान्तेन मे कान्ते नरकान्ते करोषि न?॥१॥

पिण्डस्थादिचतुर्भेदं ध्यानं कर्मक्षयाय यत्। तत्र शान्तो रसः कान्तो धुरि सर्वत्र सिद्धिदः॥२॥

विना शान्तरसं यस्तु ध्यानं मुग्धश्चिकीर्षति। स विहाय महापोतं तितीर्षति महोदधिम्॥३॥

स तु शान्तरसः स्वामिस्त्वदाधारो विजृम्भते। चिन्तयन्ति ततः सन्तस्त्वामेव तदवाप्तये॥४॥

आग्नेयीधारणायां यत् पिण्डस्थे ज्योतिरेधते। तत्त्वमेवान्यथा कर्मश्रेणिः स्याद्भस्मसात्कथम्?॥५॥

अर्ह[ज्]जिनादिनामानि तवानेकानि संस्मरन्। पदस्थध्यानवान् योगी पदमव्ययमाप्नुयात्॥६॥

अर्हद्रूपं सभासीनं त्वामरूपञ्च सिद्धिगम्। रूपस्थे रूपहीने च ध्याने ध्यायति धीरधीः॥७॥

भवन्निगदिताज्ञादिक्षान्त्याद्यालम्बनं बुधः। अभ्यस्यन् धर्मशुक्लाख्ये ध्याने अप्यधिरोहति॥८॥

जन्तोर्यातीश! या वेला त्वद्ध्यानालीनचेतसः। कालेऽनन्तेऽपि सफला खलु सैव वृथा परा॥९॥

त्वमेव ध्येय आराध्यो गम्यो नम्योऽसि योगिनाम्। ध्यानं यत्त्वां विना सर्वं तुषखण्डनवद् वृथा॥१०॥

सर्वध्येयप्रधानाय सर्वध्यानमयात्मने। तुभ्यमभ्यस्तयोगाय त्यक्तभोगाय मे नमः॥११॥

**॥इति श्रीचतुर्विंशतिजिनस्तुतौ श्रीशान्तिनाथस्य ध्यानस्तुतिनामा षोडशोल्लासः॥**

## ॥श्रीकुन्थुजिनस्तुतिः॥

श्रीकुन्थुनाथ! ते ग्रन्थकथा कर्णपथातिथिः। यथा तथा श्लथाः कुर्यान् मिथ्यामोहव्यथाप्रथाः॥१॥

जगत्यनित्यमत्यर्थमर्थदेहादिकं जडः। पश्यन्नपि न सेवेत त्वामक्षयसुखप्रदम्॥२॥

पिता माता सुतो भ्राता त्राता नान्योऽपि कश्चन। मरणादिभये जन्तोर्विना त्वामेकनायकम्॥३॥

चतुर्गतिकसंसारे दुःखयोनिकुलाकुले। न ते भ्रमन्ति तत्त्वज्ञा ये त्वदाज्ञानुगामिनः॥४॥

एकत्वादद्य यावन्मे स्थाने सिद्धिरभून्नहि। भाविनी तेऽथ साहाय्यात् भाग्याल्लब्धोऽसि यत्प्रभुः॥५॥

मलिनाचेतने देहे निर्मलश्चिन्मयः स्वयम्। अशौचभिन्नते जन्तुर्जानीते ही न मूढधीः॥६॥

सोल्लाससंवराभ्यासप्रकाशपिहिताश्रवः। कर्माणि निर्जरत्याशु त्वद्गिरोन्मीलितेक्षणः॥७॥

सुदुःप्रापबोधिमूलं दक्षाः क्षान्त्यादिलक्षणम्। आराधयन्ति ते धर्मं लोकाग्रगशिवेच्छवः॥८॥

प्रभावपावनः प्रोक्तद्वादशाद्भुतभावनः। श्रीकुन्थुनायको देयादुदयानन्दसम्पदम्॥९॥

**॥इति श्रीचतुर्विंशतिजिनस्तुतौ श्रीकुन्थुनाथस्य द्वादशभावनास्तुतिनामा सप्तदशोल्लासः॥१७॥**

## ॥श्रीअरजिनस्तुतिः॥

श्रीअर! श्रीकर! परोपकारकरुणाकर!। स्वाकार! स्वीकुरु स्वैरं मामेकस्वकसेवकम्॥

अनुभूयान्तरं सम्यग् वस्तुनो ह्यवसीयते। इतीव चक्रिता धर्मचक्रिता चादृता त्वया॥२॥

स्त्रीनिधीभादयो रागलोभारम्भादिवृद्धये। कर्मबन्धश्च रागाद्यैर्नरकान्तासुखाय सः॥३॥

इति तत्त्वधियालोच्य तृणवद्राज्यमुत्त्यजन्।भजन्संयमसाम्राज्यं न कस्याश्चर्यमातनोः॥४॥

असतोऽपि जडो भोगान् कषायविषयादिभिः। ईहते त्विह वैराग्यात् तान् सतोऽपि त्वमत्यजः॥५॥

एतैः कुमित्रवज्जन्तुः प्रेरितः पापकेलिषु। स्वार्थनाशेऽपि रज्यते त्वच्छिक्षां तात! न स्मरेत्॥६॥

अदः प्रसङ्गतः कर्म यदकार्षं करोमि च। तदुक्तौ त्रपते चेतः स्वयं वा वेत्सि किं ब्रुवे?॥७॥

तस्य प्राक्कर्मणः साटो नव्यस्याबन्धनं पुनः। यथा भवति मे नाथ! प्रसीदाथ तथा कुरु॥८॥

शिवधाम प्रजग्मुर्ये नाथ! क्वचन यान्ति ये। यास्यन्ति मादृशा ये च तव सौम्यदृशैव ते॥९॥

त्वं तीर्णस्तारकोऽसि त्वं मुक्तस्त्वं मोचकोऽसि च।

बुद्धस्त्वं बोधकोऽसि त्वं सिद्धस्त्वं सिद्धिदोऽसि च॥१०॥

भवते चेतनागर्भवैराग्यनिरतात्मने। प्रकटीकृतसत्त्वाय ज्ञाततत्त्वाय मे नमः॥११॥

**॥इति श्रीचतुर्विंशतिजिनस्तुतौ श्री अरनाथस्य वैराग्यस्तुतिनामा अष्टादशोल्लासः॥**

## ॥श्रीमल्लिजिनस्तुतिः॥

श्रीमल्लिर्मल्लिकामोदयशा जिनमति(त?)ल्लिका। कल्पवल्लिरिवाभीष्टं देयान्मदनभल्लिजित्॥१॥

भवकोटिभवं हन्ति भवद्भक्तिक्षणोऽप्यघम्। बालस्य पुनरालस्यात् कालः स्यादफलो हहा!॥२॥

कृत्रिमप्रेमबन्ध्वादिमोहेनान्तरितः कुधीः। तत्त्वबन्धुमपि त्वां नावज्ञया हन्त सेवते॥३॥

स्तम्भेन त्वय्यनमनात् क्रोधेनानिष्टचिन्तनात्। लेभिरे प्रेत्य दासत्वं दुर्गतीश्च न केऽधमाः?॥४॥

चक्रे विचक्षणैस्तेऽर्चाक्षणे कृपणता न यैः। तेऽत्रामुत्र फलं प्रापुरनन्तं धृष्टा रङ्कास्त्वहोद्विधी॥५॥

अज्ञानमतरागाद्ये व्यन्तरादि(द्या)दरादथ। न दध्युस्तव शुद्धाज्ञां हारितं जन्म तैर्मुधा॥६॥

न मद्यादिप्रमादो न बन्धुशोकोऽपि दुःसहः। त्वदागमार्थतत्त्वज्ञचेतः क्वचन बाध्यते॥७॥

धनार्जनादौ व्याक्षेपो गीतादौ च कुतूहलम्। कामकेलिरसोऽपीशात्मानं मुञ्चन्ति न क्षणम्॥८॥

आलस्याद्यन्तरायौघमपास्य त्वामुपासते। ये धन्याः कृतपुण्यास्ते कस्योपास्या न भाविनः?॥९॥

न लघुर्न महान्वापि जन्तुः कश्चित्क्वचित्प्रभो!। परं यत्र कृपा तेऽभूत् स महान्महतामपि॥१०॥

प्रतिष्ठातिगरिष्ठाय वरिष्ठाय कृपावताम्। चिदानन्दैकनिष्ठाय भगवन्! भवते नमः॥११॥

**॥इति श्रीचतुर्विंशतिजिनस्तुतौ श्रीमल्लिनाथस्यान्तरायनिरासस्तुतिनामा एकोनविंशोल्लासः॥**

## ॥श्रीमुनिसुव्रतजिनस्तुतिः॥

पवित्रचरितं शान्तदुरितं ज्ञानपूरितम्। करुणानिरतं दोषोपरतं सुव्रतं स्तुवे॥१॥

एकाश्वमिषतोऽन्येषामुपकर्तुं घनाङ्गिनाम्। आगा भृगुपुरे षष्ठियोजनान्ते निशैकया॥२॥

सर्वे सुखैषिणः सत्त्वास्तन्मुक्तौ सा च धर्मतः। धर्मो दयामयः सा तु जायते जन्तुरक्षणात्॥३॥

क्रतौ जन्तुवधस्तस्मान्नरकं तत्र चासुखम्। इति तत्र सभासीनस्त्वं कृपावानुपादिशः॥४॥

वाजीराजादयः के के देशनान्ते निशम्य नो। धर्मं बुबुधिरे पीता सुधा किं न हि रोगहृत्?॥५॥

सर्वे सत्त्वा न हन्तव्याः स्माहेति त्वं हि कोहिरुक्। देशचिन्ताधिपस्यैव न रोरस्योदरम्भरेः॥६॥

पशुपक्षिमरुद्वृक्षादयः सुरनरा अपि। सत्यापयन्ति ते सेवां युक्तं विश्वैकरक्षितुः॥७॥

या कृपा योगमुद्रा या यज्ज्ञानं या च वाक्कला। यन्माहात्म्यं च ते तन्नान्यत्र क्वापि प्रभो! मनाक्॥८॥

कृतानन्तोपकाराय निर्विकाराय नित्यशः। भुवनाद्भुतभाग्याय ससौभाग्याय ते नमः॥९॥

**॥इति श्रीचतुर्विंशतिजिनस्तुतौ श्रीमुनिसुव्रतस्वामिनो दयास्तुतिनामा विंशोल्लासः॥**

## ॥श्रीनमिजिनस्तुतिः॥

अमानमहिमानं श्रीशोभमानशमानघम्। नमामि नमिनामानं समानामानमानसम्॥१॥

मणिसिंहासनं रत्नकङ्केल्लितरुरुन्नतः। छत्रत्रयं पवित्रं भामण्डलं देवदुन्दुभिः॥२॥

प्रसूनप्रकरो जानु द्वयः स[1]च्चारुचामराः। सर्वसाधारणा वाणी मधुरा योजनानुगा॥३॥

इति ते प्रातिहार्यश्रीर्बाह्यापि जगदद्भुता। सुरस्यान्यस्य कस्यासीत् कस्ते कक्षां करोतु तत्॥४॥

गव्यूतद्विशतीं साग्रां त्वद्विहारादृतक्षितौ। स्वान्यचक्रभयं रोगा दुर्भिक्षं वैरमीतयः॥५॥

अवृष्टिश्चातिवृष्टिश्च मारयो न भवन्त्यपि। तिर्यङ्नृदेवकोटीनां योजनान्तःस्थितिः सुखम्॥६॥

दिव्यवप्रत्रयं धर्मचक्रं च चतुरास्यता। इन्द्रध्वजः पदन्यासे नव हेमाम्बुजानि च॥७॥

कण्टकाधोमुखत्वं च गन्धवाहानुकूलता। गन्धाम्बुवर्षणं पक्षिप्रादक्षिण्यं द्रुमानतिः॥८॥

इन्द्रियार्थानुकूलत्वं समं सर्वर्तुसम्भवः। रोमाद्यवृद्धिः पार्श्वे च सुरकोटिर्जघन्यतः॥९॥

चत्वारः सहजा दिव्यदेहरूपादयश्च ते। एवमेतानतिशयाँस्तव नाथ! स्मराम्यहम्॥१०॥

एतच्चिन्तनतो नित्यं सुकृतं यदहं लभे। तवांह्रिसेवा तेनास्तु मम जन्मनि जन्मनि॥११॥

**॥इति श्रीचतुर्विंशतिजिनस्तुतौ श्रीनमिनाथस्य सर्वातिशयस्तुतिनामा एकविंशोल्लासः॥**

## ॥श्रीनेमिजिनस्तुतिः॥

नयनानन्दनं नन्दिनिदानं नलिनाननम्। नयानूनं ननु ज्ञाननिलीनं नौमि नेमिनम्॥१॥

यासावीशं वशीकुर्यान्मृगाक्षी क्षणमीक्षिता। भोज्या नवभवस्निग्धा त्यक्ता तु तृणवत्त्वया॥२॥

विलासिनीविलसितैर्न मनः कस्य भिद्यते। सत्यं स्रोतस्विनीस्रोतः स्फोटयेत्पर्वतानपि॥३॥

तैरप्यभेद्यं भगवन्वज्रवत्ते मनः पुनः। कृष्णचित्रकमूलं हि प्रतिस्रोतः प्रसर्पति॥४॥

जानेऽद्भुतफलं दित्सुः प्रेम्णा भोज्यां त्वमत्यजः। सैव द्विधा प्रसिद्धाभूत् का यदन्यजिनप्रिया॥५॥

दृष्ट्वा च दर्शिता कान्ता सुधावत्परदैवतैः। युक्तं जातास्तदासक्ताः स्वयं स्मरवशा जडाः॥६॥

दृष्टा च दर्शिता कान्ता सर्वज्ञ विषवत्त्वया। तद्विरक्ता भवद्भक्ता युक्तं तत्त्वविदस्ततः॥७॥

सदर्पेन्द्रादिजेतापि स कन्दर्पस्त्वया जितः। हिनस्ति हस्तिहन्तारमपीह शरभो हरिम्॥८॥

विश्वश्लाघ्यचरित्राय पवित्राय कृपागुणैः। नमः कमनजैत्राय मैत्र्यादिसहिताय ते॥९॥

**॥इति श्रीचतुर्विंशतिजिनस्तुतौ श्री नेमिनाथस्य कामजयस्तुतिनामा द्वाविंशोल्लासः॥**

---

१ प्रमाण इति मु.

## ॥श्रीपार्श्वजिनस्तुतिः॥

प्रभावप्राभवप्रौढप्रतापप्रभवः प्रभुः। पार्श्वोपासितपार्श्वः श्रीपार्श्वः पातु पटुप्रभः॥१॥

यत्र यत्र यासु यासु प्रतिमासु तवाभिधा। तत्र तत्र तासु तासु भक्तः स्वेप्सितमश्नुते॥२॥

यो यो यदीहते चित्ते स स तल्लभतेऽधिकम्। इयत्ता तव दानस्य कथङ्कारं भवेत्ततः॥३॥

देवाः सेवाकरास्ते त्वद्दासा देवद्रुमादयः। तवोपमां ददानस्य तैर्मनस्त्रपते मम॥४॥

अतितुष्टाश्च ते किञ्चिद्ददते सुखमैहिकम्। ऐहिकामुष्मिकं सर्वं ददासि त्वं शिवं सुखम्॥५॥

न भक्ताभक्तयोस्तोषरोषौ क्वापीश ते परम्। सुखासुखफले स्यातां भक्त्यभक्ती तयोः स्वयम्॥६॥

पूजादौ तव यद्वित्तं व्ययति क्वापि यः सुधीः। तस्यानन्तगुणं तत्स्यादहो! ते दानवीरता॥७॥

जलदोऽपि घनो युक्त्या सर्ववस्तुप्रदो यथा। धर्मोपदेशदोऽपि त्वं तथार्हन्! सर्वऋद्धिदः॥८॥

सर्वातिशायिदानाय निदानाय शुभश्रियाम्। विश्वत्रयप्रसिद्धाय सिद्धाय भवते नमः॥९॥

**॥इति श्रीचतुर्विंशतिजिनस्तुतौ श्रीपार्श्वनाथस्य दानस्तुतिनामा त्रयोविंशोल्लासः॥**

## ॥श्रीवर्द्धमानजिनस्तुतिः॥

प्रवर्धमानातिशयं वर्धमानमहं जिनम्। सेवे शिववर्द्ध(र्द्धि?)मानश्रीस्पर्धमानमहोदयम्॥१॥

गर्भगे त्वयि सत्यार्थोऽजनि सिद्धार्थभूपतिः। सत्यार्थं स ददौ नाम ततस्तव महामहैः॥२॥

बाह्यान्तरङ्गरिपुभिः क्षोभ्योऽयं न मनागपि। इति चक्रे सुरैरन्यन्महावीरेति नाम ते॥३॥

तव नाम हृदि ध्यायन् देवोऽजनि स दर्दुरः। श्रेणिकस्तीर्थकृद्भावी तत्त्वन्नामैव ते ततः॥४॥

अजेयं कलिकालेऽपि शासनं ते परैरभूत्। वनस्थमपि नाम्नैव कैर्ग्राह्यं वीरवस्तु यत्?॥५॥

जिनान्तररिपून् जेतुं बलं तादृग् न मे परम्। वीरभृत्याख्यया मत्तो नूनं नङ्क्ष्यन्ति ते स्वयम्॥६॥

त्वन्नामरसिका लोला त्वद्ध्यानासङ्गि मानसम्। त्वत्पादलग्नं भालं मे विभो! भूयाद् भवे भवे॥७॥

तवासाद्याधुना बोधिं सुधाघ्रात इव स्वकम्। स्वाराज्यं तृणवन्मन्ये सन्तोषसुखवानहम्॥८॥

जिनाद्य सफलं जन्म जातोऽद्य नयनोत्सवः। मनः प्रमुदितं मेऽद्य यत्तवाजनि दर्शनम्॥९॥

ज्ञातप्रणीततत्त्वाय सत्त्वादिगुणशालिने। सुखसिद्धिनिधानाय भगवन्भवते नमः॥१०॥

श्रीजयकीर्तिसूरीन्द्रशिष्यश्रीऋषिवर्द्धनः। तेने सर्वजिनेन्द्राणां स्तुतिमेतां महाफलाम्॥११॥

**॥इति श्रीचतुर्विंशतिजिनस्तुतौ श्रीवर्द्धमानजिनस्य नामस्तुतिनामा चतुर्विंशोल्लासः॥**

## ॥श्रीसमुच्चयजिनस्तुतिः॥

रत्नत्रयोपदेष्टारं त्रिकालस्तुतिगोचरम्। त्रिजगज्जनताधारं श्रीअर्हन्तमुपास्महे॥१॥

दोषा अष्टादशापीश! नश्यन्ति तव नामतः। चतुस्त्रिँशच्चातिशयास्त्यजन्ति न तवान्तिकम्॥२॥

विश्वविश्वोपकारैकफला ज्ञानादयो गुणाः। स्तूयन्ते कति तेऽनन्ता रसनैका यदानने॥३॥

समस्तसम्पदां हेतुः सेतुः संसारसागरे। पापपावकपाथोदं सोदरस्त्वं शरीरिणाम्॥४॥

कर्मामयागदङ्कारं सत्यङ्कारं शिवश्रियः। त्वामवापुर्दुरापं ये तत्त्वं ते लेभिरे न किम्?॥५॥

किञ्चिज्ज्ञानस्य नागम्यं शक्तेश्चाशक्यमीश! नो। नापाल्यं च कृपायास्ते दानस्यादेयमस्ति न॥६॥

पाणौ चिन्तामणिः प्राप्तः कल्पद्रुः फलितोऽङ्गणे। कामधुग्गृहमायाता सिद्धः कनकपौरुषः॥७॥

दृष्टोऽक्षयनिधिर्देवास्तुष्टा वृष्टा सुधाघनाः। त्रैलोक्यराज्यं मेऽद्याभूत् लब्धस्त्वमसि यत्प्रभुः॥८॥

तत्त्वं यच्च रहस्यं यद् यद् गोप्यं ब्रह्म यत्परम्। यद्ध्येयं च यदाराध्यं तत्त्वमेव ध्रुवं विभो! ॥९॥

नेता हितविधातासि सेवकोऽस्मि तवानिशम्। कृपां कुरु कृपानाथ! देहि मे देव! दर्शनम् ॥१०॥

विश्वतत्त्वप्रदीपाय द्वीपाय भववारिधेः। शाश्वतानन्दकन्दाय नमस्ते परमात्मने ॥११॥

**॥इति श्रीमदञ्चलगच्छेशश्रीजयकीर्तिसूरिशिष्यश्रीऋषिवर्धनसूरिकृतायां**

**श्रीचतुर्विंशतिजिनस्तुतौ सर्वजिनस्तुतिनामा पञ्चविंशोल्लासः॥२५॥**

**॥ग्रंथाग्रं २७०॥**

(१.१८)

### आ.श्रीऋषिवर्द्धनसूरिरचितम्

## ॥विहरमानजिनस्तवनम्॥

### (श्रीशंत्रुजय तीरथ सार)

सकलसुरासुरनर[न]तचरणं, श्रीसीमन्धरमविचलचरणं, सेवे विशदाचरणम्।
युगमन्धरजिनपञ्जितकरणं, बाहुजिनं सेवकसुखकरणं, पञ्चचापशतकरणम्॥१॥

श्रीसुबाहुनाथं नयशरणं, श्रीसुजातदैवतमविशरणं, श्रयत शरण्यं शरणम्।
श्रीस्वयंप्रभजिनं भयहरणं, श्रीवृषभाननमजरामरणं, भवजलतारणतरणम्॥२॥

नमतानन्तवीर्यजिनराजं, सुरप्रभमभिभूतरमाजं, रञ्जितसुजनसमाजम्।
श्रीविशालनायकमव्याजं, वज्रधरं वरवैभवभाजं, ज्ञा[न]कलाविभ्राजम्॥३॥

चन्द्राननमाननजितचन्द्रं, चन्द्रबाहुमुत्साहवितन्द्रं, बोधितबहुबुधचन्द्रम्।
भजत भुजङ्गमङ्गरुचिचन्द्रं, जगदीश्वरमीश्वरं जिनचन्द्रं, तनुपरिमल[शुचि]चन्द्रम्॥४॥

नेमिप्रभविभुमभिवन्देऽहं, वीरसेनमपगतसन्देहं, परमरूपमदेहम्।
प्रगुणगौरगुणगौरवगेहं, महाभद्रमुज्झितरागेहं, निहतमोहमन्देह[म्]॥५॥

भवपरिभवभवविषयापरतं, देवयशः स्वामिनमनवरतं, शान्तरसाशननिरतम्।
हृदयस्थं सुरगिरिसमगुरुतं, भो! भविकाजितवीर्यं कुरुतं, मधुरसुधारससु[र]तम्॥६॥

इति संस्तुता दितितनयसुरपतिसेव्यमानपदद्वयाः,
श्रेयःप्रकाशनधर्मदेशनलालसानलसाशयाः।
विहरन्त एते सन्तु मे ते विंशतिर्जिननायकाः
परिशोभशानाः कुशलमालाः श्रीसुखोदयदायकाः॥७॥(हरिगीतम्)

**॥इति वीसविहरमानश्रीजिनस्तवनं श्रीऋषिवर्द्धनसूरिभिः कृतम्॥**

(१.१९)

### आ.श्रीजिनप्रभसूरिरचितम्

## ॥पञ्चपरमेष्ठिस्तवनम्॥

सुश्रियं श्रीमदर्हन्तः सिद्धाः सिद्धिपुरीपदम्।
आचार्याः पञ्चधाचारं वाचका वाचनां वर(रा)म्॥१॥

साधवः सिद्धिसाहाय्यं वितन्वन्तु विवेकिनाम्।
मङ्गलानां च सर्वेषां प्रथमं भवति मङ्गलम्॥२॥

अर्हमित्यक्षरं मायाबीजं च प्रणवाक्षरम्।
एनं नानास्वरूपं च ध्येयं ध्यायन्ति योगिनः॥३॥

हृत्पद्मषोडशदलस्थापितं षोडशाक्षरम्।
परमेष्ठिस्तुतेर्बीजं ध्यायेदक्षरदं सदा॥४॥

मन्त्राणामादिमं मन्त्रं तन्त्रं विघ्नौघनिग्रहे।
ये स्मरन्ति सदैवैनं ते भवन्ति जिनप्रभाः॥५॥

**॥इति पञ्चपरमेष्ठिस्तवनम्॥**

(२)

# प्राकृतस्तोत्राणि

(१.२)

अज्ञातकर्तृकम्

## ॥कल्याणकतिथिगर्भितपार्श्वजिनस्तोत्रम्॥

(आर्या)

बहुलाइ चविओ, पाणइकप्पाउ जउ चउत्थीए।
उपन्नो वाणारसि[य], वम्मादेवीय कुच्छिंसि॥१॥

पोसबहुलाइ जाओ, दसमीए दिक्खमुवगउ त्तम्मिं।
इक्कारसीइ नाणं, चित्तचउत्थीय किण्हाए॥२॥

सावणसुक्कलअट्ठम्मि, मुक्खं पत्तोसि पासजिणनाहो।
सम्मेयसेलसिहरं, विहिय[उ] सो बोहिलाभं मिं॥३॥

॥इति पार्श्वनाथस्तोत्रम्॥

## (२.२)
### अज्ञातकर्तृका
## ॥स्तम्भनकपार्श्वजिनविज्ञप्तिः॥
### (आर्या)

सुरनरकिन्नरपणयं, कमठासुरदप्पभंजणं पयडं। पत्थेमि पासनाहं, थंभणनयरम्मि निवसंतं॥१॥

सामिय सुणेह सम्मं, करेमि जह नाह पत्थणा का वि।
सा सफला कायव्वा, न विलक्खो होमि जेणाह(हं)॥२॥

सव्वेसिं हिययगए, पूरेसि मणोरहे तुमं सामि!। इक्कंपि मज्झ कज्जं, विसरिअं तुम्ह किं नाह!॥३॥

जइ विऽज्जुग्गो जिणवर, तुम्ह पसाएण जुग्गयं जामि। चंदेण वि परिअ[रि]ओ, हरिणो पुहविं पयासेइ॥४॥

अधणाणं देसि धणं, अपुत्तवंत्ताण देसि तं पुत्तं। वाहीण हरसि रोगं, सोगं तह सोगवंताणं॥५॥

पढिआ निम्मलविज्जा, धणेण मह नाह किं पि न हु कज्जं। जं पुण पत्थेमि अहं, तं पुण जाणेसि तुमं चेव॥६॥

पडिवन्ना तुह सेवा, पडिवन्नं देव! सासणं तुम्ह। जइ गुरु! कुणसि पसायं, हियत्थिअसंपयाणेण॥७॥

जंपंति पंडिअजणा, पहुणो भत्तीइ सिज्झई कज्जं। एअं लोअपसिद्धं, होइ फुडं तुह पसाएण॥८॥

कप्पदुम्मंमि लद्धे, रोरो किं नाह! दुक्खिओ होइ। किं वासर(रु)ग्गमणे, कमलवणं मुउलिअं कह वि॥९॥

पाउससमयंमि जहा, सिहिंडिणो सोअनिब्भा(ज्झिआ?) नेव।
चंदस्स समागमणे, किं वा मुउलेइ कुमुअसंडं॥१०॥

चिंतामणि व्व दुलहे, निन्नासिअकामधेणुमाहप्पे। पत्ते तुमम्मि जइ पहु!, मणोरुहो होइ किं विहलो॥११॥

न य अन्नो मह सरणं, न य अन्नो को वि बंधवो सामि!।
ता किं ममं अवक्षसि(उवेक्खसि), विज्जंते सयलसामत्थे॥१२॥

ता पहु करेसि तत्तं, मज्झ अणाहस्स सरणरहिअस्स। किं न गणेसि महायस!, विलवंतं दीणवयणेहिं॥१३॥

अन्नं पि जणो जंपइ, संतो पणईण वच्छला हुंति। एअं मह विवरीअं, संजायमंदपुन्नस्य॥१४॥

कुण निक्कारणबंधव!, मज्झ दयं जइ वि निद्दओ नाह!। वरसंतो अंबरुहो, सम विसमं वा न जोएइ॥१५॥

दिज्जउ मह पडिवयणं, किज्जउ करुणारहस्स मे करुणा। जेणं वि अ सप्पुरिसा, सरणागयवच्छला हुंति॥१६॥

रयणनिरंतरभरिओ, मित्तो जस्सत्थि जलनिही निच्चं। सो किं खणे खण च्चिय, विसूरए रयणकोडीहिं॥१७॥

नूणं पमाइबहुलो, अहवा तुज्झ सासणम्मि संदेहो।
नियमो दोलाइ मणं, निस(न सि)ज्जते [ते?]ण[1] मह कज्जं॥१८॥

---

१ न सिज्झइ तेण इति भाव्यम्?

जाणामि जह अहन्नो, निलक्खणो सयलपुन्नपरिहीणो। अन्नह कह पडिवन्ने, तुमे वि नाहे अहं दुहिओ॥१९॥

सच्चं लोआहाणं, इच्छियदोसं न पिच्छए जेण। अब्भत्थेमि जिणेसर!, {जं} पुणो पुणो तेण नल(निल्ल)ज्जो॥२०॥

किं बहुणा भणिएणं, उच्छंगे तुह मए सिरिं(रं) खित्तं। एवं च ट्ठिए जिणेसर!, जं जाणसि तं करिज्जासु॥२१॥

जिणसासणरत्तेण, संवेगरसं समुव्वहंतेण। विन्नत्तो पासजिणो, इच्छिअफलसिद्धिकामेण॥२२॥

**॥इति स्तंभनकपार्श्वनाथवीनती॥**

## (२.३)
### अज्ञातकर्तृकम्
## ॥शाश्वतचैत्यस्तोत्रम्॥
### (आर्या)

नमिऊणं सव्वजिणे, सिद्धे सूरी तहा उवज्झाए। साहूय जुगप्पवरे, वुच्छं जिणकित्तणं तत्तो॥१॥

चुलसीलक्खसहस्सा, सगनवई तिवीस उड्ढलोगम्मि।
कोडीउ सत्त लक्खा, बावत्तरि भवणवासीसु॥२॥

मेरुसु असी जिणाला, वक्खारेसु य असीय दस कुरुसु। वीसं गयदंतेसुं, जयंति तीसं कुलगिरीसु॥३॥

वेय[ड्ढे]सु य सत्तरसयं च नंदीसरम्मि बावन्ना। उसुयरे माणुसुत्तर, कुंडलरुयगेसु चउ चउरो॥४॥

एवं सव्वग्गेणं, चउ सय अडवन्न तिरियलोगम्मि। विंतरजोइसमज्झे, जिणाण भवणा असंखिज्जा॥५॥

अन्नाइं कित्तिमाइं, नगनगरपुरेसु गामगामेसु। विहिणा जिणभवणाइं, भत्तीए वंदिमो ताइं॥६॥

इय जिणहराण नियरं, संखेवेणं मए समक्खायं। भावेण भणिज्जंतं भवविरहं कुणउ भव्वाणं॥७॥

